नमस्तुभ्यंभृगुवंशावरायव महातपामुनेश्रेष्ठसप्तकल्पांतजीवित मार्कंडेयनमस्तुभ्यंदीर्घायात .... मार्कं
डेयमहाभागप्रार्थयतोकृतोजालि चिरजीवियथात्वंभो.. .. आत्माय
नमः हनुमतेनमः विभीषणायनमः कृपायनमः परशुरामायनमः कार्तिकेयायनमः जन्मदेवतायै
नमः स्थानदेवतायैनमः प्रत्यक्षदेवतायैनमः वासुदेवायनमः क्षेत्रपालायनमः पृथिव्यैनमः अर्घ्यो०

© Dharmartha Trust J&K. Digitized by eGangotri

तेजसे· वायवे· आकाशायनमः ·········· संपूज्य प्रार्थयेत् देयतो ·········· प्रयच्छ त्वायुरारोग्यं यशः
ॐ. सौ ······ व संपदं त्वामन्त्रहीनं ······· नेमक्तिहीनं महामुने यदर्चितं मयादेवं परिपूर्णं तदस्तु मे इति पठित
२८ पक्ति दर्भ ब्राह्मणाय पतितलदानीदियद्रव्याणि संपूज्य कुशत्रयपतिजलेलत्वान्यादाय अद्य मदीयजन्मदीने दीर्घा
युष्कामः पत्तानतिलान् सोमदेवतान् यथा नामगोत्राय ब्राह्मणाय ददातु महामन्त्रं जपे इति दद्यात् ततो घृ
ताक्तलिलैर्व्याहृतिभिर्होमः ततः पयसा सर्वभूतेभ्यो बलिर्नमः मेमेति बलिं दद्यात्। तंडुलेभ्यो नमः इति संसपू
ज्य जलेन हिता कुशजपतिलजलान्यादाय अद्य मदीयजन्मदिने दीर्घायुष्कामः पत्तान् सोमदेवतान् तंडुला
न् सोमदेवतान् पयोश नामगोत्राय ब्राह्मणाय ददातु सह मन्त्रं जपे घृताय नमः इति घृतं संपूज्य जलेन सिक्तो अद्य
मदीयजन्मदिने दीर्घायुष्काम् इदं उदकं प्रजापतिदेवतं यथी लेगुलमिश्रितं मार्कंडेयवरे लब्धापि वाम्यायुष्य
हेतवे नामगोत्राय ब्राह्मणाय ददातु सह मन्त्रं जपेति ततस्तिलगुलासहितं दुग्धपाने तत्र मंत्र अश्रद्धाः इमिते २८

© Dharmartha Trust J&K. Digitized by eGangotri

क्षीरंसतिलंगुडमिश्रितं मार्कंडेयवरंलब्ध्वापिबाम्यायुष्यहेतवे इतितिलंगुडसहितंदुग्धंपीत्वाचम्य मार्कंडेया
यनमः गोभ्योनमः ब्राह्मणेभ्योनमः इतिप्रणम्यमार्कंडेयदामक्षेतिविसर्जयेत् ग्रंथांतरेतुमांगल्यस्नानंकृत्वा
कुमुदादिदेवताःसंपूज्ययथाशक्तिब्राह्मणभोजनं दक्षिणांचदत्वासुवासिनीभिर्नीराजितोनूतनवस्त्रोब्राह्म
णीभिःशिशुभ्यश्चापूपपूरिकाःसाज्याःकुमुदादिप्रीतयेआयुर्वृद्धयेचवायनानिदद्यात् वर्षांतेसुहृद्भ्योदद्यादशवंशपे।
टिकाःसमोदकादिव्राघेनिधायनूतनवस्त्राच्छादिताःपेटिकाजीवत्पतिपुत्रास्याद्वांतदाशिषोगृह्णीयात् इदंस
र्वंजीवंतीमातेवापत्यायुषेकुर्यात् इतिवर्षायनेविधिः अथचूडाकरणं तत्रकालस्तावत् तत्रप्रथमेवर्षेतृतीयेवा उप
नीत्यासहवायथाकुलाचारंचौलंकार्यं उदगयनेशुक्लपक्षेगुरुशुक्रयोर्बाल्यवार्धकास्तमयाभावेऽदयेऽनधिके
मासिज्योतिःशास्त्रोक्तप्रशस्ततिथिवारलग्नशुभमुहूर्तेदिनएवनतुरात्रौकार्यंयदिगर्भाधानादिसंस्कारतो
पन्नदाप्रायश्चित्तंकृत्वाकालात्ययनिमित्तंप्रायश्चित्तहोमंचकृत्वाचौलंकार्यं तदाहभगवान् आरायाश्मनसाचौ

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ २९

लाकालेनीनेन्तुकर्मणां व्याहृत्याज्येनसंस्कृत्य हुत्वाकर्मयथाक्रमं कार्यमितिप्रोषः प्रायश्चित्तंचसप्तवासायतेषां
केकलोपेपिपादकृच्छ्रंसमाचरेत् चौलादर्वा···· हीतप्राय··· दनंतरो अथप्रयोगः ततवहिः शालायाभवति
तस्मिन्नहनिस···· कामादायामात्याह········ सोपरि मया········· कल्पसमयेतिष्ठेत तत्रसंक तत्रसंकल्प
देशकालौस्मृत्वाश्च··· ··· ··· ··· ······ मिहद्विजागपरमेश्वरप्रीत्यर्थंचौला·· ······
········· ········· मंडपस्थापनंमातृकापूजनपूर्वकंनांदीश्राद्धंवाहे·· रिषो
········· ········· भोजयेत् शुभेमुहूर्तेयरिसमहना······
········· ········ पविष्टयपत्नी कुमारसहिता पुनर्देशकालौनिर्दिश्यपश्चस्यकुमारस्य
चूडाकरणमहंकरिष्ये तत्रनपूर्वेणब्रह्मणोगमनाउत्तरेणपात्रासदनं द्वेपवित्रेताम्रमयीआज्यस्थाली पा
लाशयः समिधः प्रीवादायारौ ससिद्धनमेआज्यभागौ पूर्ववैयात्रंदक्षिणा कृतपिंडः। सकेशगोमयपिंडस्यगो २५

© Dharmartha Trust J&K. Digitized by eGangotri

हेनिष्क्रमणे एतानैकल्पिकान्पदार्थानहंकरिष्ये अथदेवतानाभिध्याने तत्रप्रजापतिं इंद्रं अग्निं सोमंअग्निंवायुंसूर्यं
अग्निंवरुणौ अग्नीवरुणौ अग्निं वरुणंसवितारंविष्णुंविश्वान्देवान्मरुतःस्वकान्वरुणं प्रजापतिं अग्निंस्विष्टकृतं
एताश्चाज्येनअस्मिन्कर्मण्यहंयक्ष्ये ततोब्रह्मोपवेशनाद्याज्यभागांतेविशेषः नात्रवरः आसादनानंतरमुपकल्प
नीयानि शीतोदकं उष्णोदकं घृतपिंडंत्रेणीगल्ली। सप्तविंशतिकुशतरुणानि ताम्रपरिस्रुतआपसः दूर्वाः
आनडुहगोमयपिंडं नापितश्चानाचरः एतानुपकल्प्यपवित्रेकृत्वाप्रोक्षणीसंस्कारादिपर्युक्षणांतंकृत्वा प्रजाप
तयेस्वाहा इदंप्रजापतये इंद्रायस्वाहा इदमिंद्राय अग्नयेस्वाहा इदमग्नये सोमायस्वाहा इदंसोमाय भूर्भुवःस्वरिति
महाव्याहृतीनांप्रजापतिऋषिः क्रमेणगायत्र्युष्णिगनुष्टुप्छंदांसि अग्निवायुसूर्यादेवताः होमेविनियोगः भूःस्वा
हा इदमग्नये भुवःस्वाहा इदंवायवे स्वःस्वाहा इदंसूर्याय त्वन्नोअग्नइतिवामदेवऋषिः त्रिष्टुप्छंदः अग्नीवरुणौ
देवतेहोमेविनियोगः उतेन्नोस्मिन्स्वाहा इदमग्नीवरुणाभ्यां सत्वन्नोअग्नइतिवामदेवऋषिः त्रिष्टुप्छंदः अ

© Dharmartha Trust J&K. Digitized by eGangotri

ग्रीवरुणोदेवताहोमो सतन्नोऽपयिस्वाहा इदमग्नीवरुणाभ्यां अयाश्चाग्न इतिवामदेवऋषिः बृहतीछंदा
ओं अग्निर्देवताहोमेउंअयाः षजंदः स्वाहा इदमग्नयेऽयेनेप्राप्तमितिवामदेवऋषिः त्रिष्टुप्छंदः वरुणः स
३० वितावितुर्विष्णोर्देवामरुतः स्वर्कादेवताहो येतशतं स्वर्काः स्वाहा इदंवरुणायसवित्रेविश्वेवेविष्वेभ्योदे
भ्योमरुद्भ्यः स्वर्केभ्यश्च वदुत्तममितिशुनःशेपऋषिः त्रिष्टुप्छंदः वरुणोदेवताहोमे संस्रवप्राशनापवि
त्रप्रतिपत्तिः पूर्णपात्रदाने वस्त्रन्नचूडाकरणांगतयाविहितं इदम् - - - - उपमहासंप्रददे प्रणीताविं
शोकः ततःप्रणीतासमुत्स - - - - - - - - सिंचति उस्नेनवायइतिमंत्रस्यपरमेष्ठीऋषि - - निष्टु - - - - - - - - - - - - -
- - - देवताउदकामेके - - - - - - - - - - - - - - - उदकेनेहादितेकेशान्वपेतिमंत्रेण अग्रे - - - - -
- - - - - दायदक्षिणांगोदानमुंदतिसवित्रेतिमंत्रस्यप्रजापतिऋषिः गायत्रीछंदः
कामोदेवताक्लेशोविनियोगः सवित्राप्रसूता दैव्याआपउंदंतुजेनतन्नदीर्घायुत्वायवर्चसइत्यनेनमंत्रे ३

© Dharmartha Trust J&K. Digitized by eGangotri

- - - - - - - - - - - - - - - - पत्त्रीणिकुशान्तर्हणान्येतर्दष्मतिओषधेत्रायस्वेतिप्रजापतिऋषिः - - - - - - - - -
- - - - - - - - - - - - - - - - दनेविनियोगः ओषधेत्रायस्वेतिमंत्रेण ततस्तान्नपरिहृतमापसेत्क्षुरमादत्तेशिवोना
मेतिप्रजापतिऋषिः बृहतीछंदः क्षुरोदेवताक्षुरग्रहणेविनियोगः ॐशिवोनामासीतित्यनेनमंत्रेण ततोदर्भंतृ
णं तर्हितेषुक्षुरसंलग्नंकरोतिनिवर्तयामीतिप्रजापतिऋषिः यजुः क्षुरोदेवतासंलग्नीकरणेविनियोगः ॐयेना
वपत्सविताक्षुरेणसोमस्यराज्ञोवरुणस्यविद्वान् तेनब्रह्माणोवपतेदमस्यायुष्मंजरदष्टिर्यथासदित्यनेनमंत्रेण
ॐनिवर्तः पापेतिमंत्रेण येनावपदितिमंत्रस्याश्वलायनऋषिःपंक्तिछंदः सवितादेवताकेशान्तकरणछेदनेविनियोगः ॥
एततत्रस्मिन्नेवदक्षिणगोदानेएवंतेनायस्तावद्धयेत् स्त्रीकर्मकर्तव्यं तत्रोदकमादायोंदने त्रेण्यापाशल्यापविन
यने कुशात्पाशात्रयांतर्धनोदक्षुरणीष्मनोछेदने गोमयपिंडेप्रासने एवंदक्षिणगोदानेवारद्वयंकृत्वापश्चिमगो
दानेपूर्ववन्मंत्रवर्जंदनादिकर्मकुर्यात् तत्रनक्ष - - - नेमंत्रवदान्तत्वात् केशच्छेदनेमंत्रविशेषः आयुषमि

© Dharmartha Trust J&K. Digitized by eGangotri

तिनारायणऋषिः उष्णिकछन्दः आशीर्देवताछेदने विनियोगः ॐ आयुषं त्र्यायुषमिति मंत्रेण ततः तूष्णीं पुनर्वारिद्वयेक
ॐ मेकुर्यात् उत्तरगोदाने पि पूर्ववडुंदनादि अत्रापि केशछेदनमंत्रे विशेषः येनभूरिश्चरतिमंत्रस्य वामदेवऋषिः यजुः
३१ क्षुरो देवताछेदने विनियोगः ॐ येनभूरिश्चरादिवं ज्योक्च पश्चाद्धि सूर्यं तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय सु
श्लोक्याय स्वस्तये इत्यनेन मंत्रेण केशछेदनं अत्रापि वारद्वयं तूष्णीं मुंदनादिक्रिया कार्या ततस्त्रिः क्षुरेण शिरः प्र
दक्षिणं परिहरति यत्क्षुरेणेति वामदेवऋषिः यजुः क्षुरो देवता भ्रामणे विनियोगः ॐ यत्क्षुरेण मज्जयता सु
पेशसा वप्ता वपति केशान् छिंधि शिरो मास्यायुः प्रमोषीरित्यनेन मंत्रेण द्विस्तूष्णीं ततस्तेनैवोदकेन सर्वं शिर :
आर्द्रीकृत्य क्षुरेण आपिताप्रयच्छन्ति अक्षण्वमिति वामदेवऋषिः यजुः क्षुरो देवता क्षुरदाने विनियोगः ॐ अ
क्षण्वं परिवपेत्यनेन मंत्रेण स च नापिता उदङ्मुखस्थितस्य प्राङ्मुखस्थितस्य वा कुमारस्य यथोक्तं केशापनयक
रणं करोति यस्य गोत्रे यद्भवितं वसिष्ठानां दक्षिणभागे शिखा कर्तव्या आत्रेयाणां काश्यपानां च उभयप्रदक्षिणा ३१

© Dharmartha Trust J&K. Digitized by eGangotri

णोत्तरेभागे त्र्यंगिरसां पंचशिखाः भृगूणां शिखारहितमुंडनं एवं केशानुच्छ्रासकेशं गोमयपिंडं अनुगुप्तगोष्ठे निखन
यच्चूडाकरणं कमस्थिचार्याय वरं ददीति भूपसीद दक्षिणां दत्वा ब्राह्मणेभ्यो दद्यात् सर्वाकेभ्यो भोजनं च संकल्पकर्मसं
पूर्णतावाचमितापस्यसम्पत्येत्युक्त्वा विसृजेन सस्तूत्याशिषो ब्राह्मणोक्ताः स्वयं कुमारस्य अष्टह्रगीयात् एतत्सर्वं कुमार्या अ
प्यमंत्रहं कहोमस्कसमंत्रक इति मध्ये शिरसि चूडास्याद्दसिष्टानो उद दक्षिणे उभयोः पार्श्वयोरत्रिकश्यपानां शि
खामता शिशोर्माविगम ...... चूडाकर्म मंत्रकारयेत् पंचमाद्वादयोर्धं जुगर्भिणामपि कारयेत् सहोपनीत्या
कुर्याद्वेन तदा दोषान विद्यते इति सदाशिवदीक्षितसूनकाशीदीक्षितकृते प्रयोगरत्ने चूडाकर्म प्रयोगः अथ क
३३ र्णवेधः वर्षे तृतीये पंचवो .... कमासशुक्लपक्षतिथिवारनक्षत्रादिशुभकाले पूर्वाह्णे गाविघ्नेशशिवब्रह्म
चू. वेदसूर्यादेगीशा .... देवतानो ब्राह्मणान्यथाविभवैसंपूज्य कुमारं प्राङ्मुखं उपवेश्य दक्षिणं कर्णमभि
भि .... रितिमंत्रस्य प्रजापतिऋषिः त्रिष्टुप्छंदोलिंगोक्ता देवताः कर्णाभिमंत्रणे विनियोगः ॐ भ ....

© Dharmartha Trust J&K. Digitized by eGangotri

-- -- शृन्यदारनिमंत्रेणसर्वकर्मभिमंत्रयते नादसंतीवेदाग्नीनिमंत्रस्यप्रजापतिरऋषिः त्रिष्टुप्छंदालिंगोक्तादेव
ॐ· ताकस्माभिमंत्रणेविनियोगः ५ .... स्नतीवेयावमेतीविमंत्रेण तस्यशिरशोः कर्मयोर्वेध्यस्यंतमलक्तकरसेनोक्त
३२ --- तोयथाविभवंसुवर्णरूपताम्रलोहसूच्यामांगलिकपदादिसूत्रोपेत -- मौक्तिकेवान्यगवाकुशलेनसुभगारित
यावाकुमारस्यामधुरेपताकर्णौवेधयेदनाहतेसूर्यरश्मिभयः ताथलेगणदौपित्रादिः कुमारस्यपूर्वंदक्षिणः कु
मायाक्लिपूर्वंदक्षिणः कुमार्याक्लिपूर्ववामः कर्णौवेधः वेधननंदत्रातृतीयनक्षत्रेकर्मतालनमुख्यदारि
एगरोहणार्थंकार्यं तूटौवकर्णौ यथाभ्राभरणधरणक्षमताभवतितथावर्धनीयौः पुनः सूर्यरश्मिप्रवेश
योरंध्रपर्यंतवर्धयेत् लंवकर्णतानुविलिखिता स्त्रीणांयथेच्छं इतिप्रयोगरत्नेकर्णवेधप्रयोगः अथविद्यारं था
भः मदनपारिजातेमार्कंडेयः प्राप्तेथपंचमेवर्षेप्रसुप्तेजनार्दने षष्ठीप्रतिपदंचैववर्जयितात्तथाष्टमी
रिक्तांपंचदशीचैवसौरिभौमदिनेतथा एवंसुनिश्चितेकालेविद्यारंभंतुकारयेत् पूजयित्वाहरिंलक्ष्मी ३२

© Dharmartha Trust J&K. Digitized by eGangotri

नृसिंहः उत्तरायणगे सूर्ये कर्तव्यं ह्युपनायनं श्रुतिः वसंते ब्राह्मणमुपनयीत वराहः माघादिपंचमासेषु मेखलाबं
धनेषि शिष्टः ज्येष्ठमासेन ज्येष्ठस्य जन्ममासेन सर्वेषां सकृपदे हितीयादिस्वाध्यायप्रतिपत्तिथिषु नानध्यायेन नैमित्तिकान
ध्याये पूर्वाह्णे शुभे मुहूर्ते शुभचंद्रादा दोगुरुशुक्रयोर्वाल्यवार्धकास्तदा हित्यादौ ज्योतिर्विदुक्ते शुभकाले उपन
यनं कार्यं उपनेतृक्रममाह गर्गः पिता पितामहो भ्राता ज्ञातयो गोत्रजाग्रजाः उपनयनेऽधिकारी स्यात्पूर्वाभावे
परः परः तथा पित्रैवोपनयेत्पुत्रं तदभावे पितुः पिता तदभावे पितुर्भ्राता तदभावे सोदरः अधिकारसिद्धये प्रा
यश्चित्तमाह वृहद्विसिष्ठः कृच्छ्रत्रयं चोपनेता त्रीन्कृच्छ्रांश्च वटुश्चरेत् आचार्यो द्वादशसहस्रं गायत्रीं वा जपेत् तथा नांदी
श्राद्धे कृते पश्चादनध्यायस्त्वकालिकः मौंजीबंधं तदा कुर्याद्दिदारंभेन कारयेत् अकालिकः गर्जनिर्घातादिनिमि
त्तकाः इत्युपनयनोपयुक्तविचारः अथोपनयनप्रयोगः तत्र देशकालौ स्मृत्वा अस्य कुमारस्य द्विजत्वसिद्ध्या वेदा
ध्ययनाधिकारार्थं उपनयनमहं करिष्ये तदंगभूतं गणपतिपूजनपूर्वकं स्वस्तिवाचनपूर्वकं अविघ्नस्ज·

© Dharmartha Trust J&K. Digitized by eGangotri

नमेउपस्थापनेमातृकापूजनंसर्वंकृत्वानांदीश्राद्धंच करिष्ये उपनयनेनसह चौलकरणपक्षेतदपि संकल्ये
भे॰ कीर्तयेत् तत्रेणवविघ्नपूजनमेउपनननांदीश्राद्धानिकुर्यात् अविघ्नपूजनादिकंसमाप्य अथापरेद्युः कृतनित्य
३४ क्रियःकृतमंगलस्नानमलंकृतंकुमारंदेशकालौसंकीर्त्यास्यकुमारस्योपनयनेकर्तुंतत्पात्रेगभूतंवपनंकरि
ष्येइतिसंकल्प्यवपनंकारयेत् ततोब्राह्मणजपभोजनं ततःकृतमुंडितरायवबत्तभेनमे वहिःशालायांपंचभूसं
३५ स्कारान्कृत्वालौकिकाग्नेःस्थापने ततःपुष्पमालादिदिभिरलंकृतंवटुंमौहूर्तिकोक्तेशुभमुहूर्तेआचार्यपुरु
षाःआचार्यसमीपमानयंति ततआचार्यः आनीतंकुमारंअग्नेःपश्चान्मद दक्षिणतोवस्थाप्यउदङ्मुखमितितिरेण
ब्रह्मचर्यमागामितिब्रूहीत्याचार्योवदति कुमारंप्रति ब्रह्मचर्यमागामितिकुमारः ब्रह्मचार्यसानीतिब्रूही
त्याचार्यः ब्रह्मचार्यसानीतिमाणवकः अथैनमाणकमाचार्योवासः परिधापयति येनेंद्रायेतिमंत्रस्यअंगि
राऋषिः बृहतीछंदः बृहस्पतिर्देवतावस्त्रपरिधानेविनियोगः ॐयेनेंद्रायबृहस्पतिर्वासः पर्यदधादमृतेन ३४

© Dharmartha Trust J&K. Digitized by eGangotri

वापरिदंधाम्याप्रषेदीर्वा सुतायवलाय ~~वत्साय~~ ववंस इत्यनेन मंत्रेण आचार्यस्य मंत्रपाठः ततआचार्यो माणवकस्य
कटिप्रदेशे मेखलां प्रदक्षिणं त्रिर्वेष्टयित्वा यथाप्रवरं ग्रंथितो मेखलावध्नाति इयं दुरुक्तमिति मंत्रस्य वामदेवऋषि
त्रिष्टुप्छंदः मेखला देवता मेखलाबंधने विनियोगः ॐ इयं दुरुक्तं परिबाधमाना वर्णं पवित्रं पुनती म आगा
त् प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखलेयमिति मंत्रेण वटुकस्य मंत्रपाठः ततः यज्ञोप
वीतपरिधाने यज्ञोपवीतमिति मंत्रस्य परमेष्ठी ऋषिः त्रिष्टुप्छंदः लिंगोक्ता देवता श्रौतस्मार्तकर्मा
नुष्ठानसिध्यर्थे उपवीतधारणे विनियोगः ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् आयुष्य
मग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः इति मंत्रेण माणवकस्य ततः उक्तविधिना द्विराचम्य ऐणेय
स्याजिनस्योत्तरीयकरणं तूष्णीं माणवकस्य मित्रस्य चक्षुरिति मंत्रेण कृष्णाजिनपरिधानमिति केचित्
मित्रस्येति मंत्रस्य परमेष्ठी ऋषीः त्रिष्टुप्छंदः लिंगोक्ता देवता अजिनधारणे विनियोगः ॐ मित्रस्य चक्षुर्धरु

© Dharmartha Trust J&K. Digitized by eGangotri

णंवलीयस्तेजोमयश्चाक्षिस्यस्यविरटः समिद्धं अन्नाहनस्यैवसनेजरिस्नुः यरीदेवाजञजिनं दधेहमितिमंत्रेण ततआ·
डों· चार्योदंडंप्रयच्छतिमाणवकः प्रतिगृह्णातियोमेदंडइतिमंत्रस्यप्रजापतिऋषिः यजुःदंडोदेवतादंडग्रहणेविनि·
३५ योगः ॐयोमेदंडःपरापतद्वैहायसोधिभूम्यां तमहंपुनरादद आयुषेब्रह्मणेब्रह्मवर्चसायेतिमंत्रेण दीक्षांवेदेके
दंडप्रतिग्रहणमिच्छंति अथाचार्यःस्वकीयमंजलिंजलेनपूरयित्वानेनजलेनांजलिस्थेनमाणवकस्यांजलिंपूर·
35 यति आपोहिष्ठेतित्र्यृचस्यसिंधुद्वीपऋषिः गायत्रीछंदः आपोदेवताउदकासेके विनियोगः ॐआपोहिष्ठा०
आपोजनयथाचनइत्येतैस्त्रिभिर्मंत्रैः ततआचार्योमाणवकंप्रेषयतिसूर्यमुदीक्षस्वेतिप्रेषितोमाणवकःसू
र्यमुदीक्षतेतच्चक्षुरितिमंत्रस्यदध्यङाथर्वणऋषिः पुरउष्णिकछंदः सूर्योदेवतासूर्योदीक्षणेविनियोगः ॐ
तच्चक्षुर्देशरदःशतादित्येतेन ततआचार्योमाणवकस्यदक्षिणस्कंधस्योपरिहस्तंनीत्वामाणवकस्यहृदय
मालभतेममव्रतेतइतिमंत्रस्यप्रजापतिऋषिः त्रिष्टुपछंदः बृहस्पतिदेवताहृदयालंभनेविनियोगः। म ३५

© Dharmartha Trust J&K. Digitized by eGangotri

मब्रतेते॰ बृहस्पतिष्ट्वानिधुनक्कमहामित्यनेननमंत्रेण आचार्यस्यमेत्रपाठः कुमारस्यदक्षिणेहस्तंगृहीत्वाकोनामा
सीदृत्याचार्योस्वनामग्रहणपूर्वकंअहंभोःइतिकुमारः ततःकस्यब्रह्मचार्यसीत्याचार्यविदेत् भवतइत्युच्यमाने
कुमारेणइंद्रस्याग्नेस्यप्रजापतिऋ॰ययजुः लिंगोक्तादेवताजपेवि॰ इंद्रस्यब्रह्मचार्यस्याग्निराचार्यस्तवाहमाचा॰
र्यस्तवामुकशर्मन्नित्याचार्यापठेत् अथेनंकुमारमाचार्योभूतेभ्यपरिददाति प्रजापतयेत्वेत्यादीनांप्रजापति
ऋषिः यजुर्लिंगोक्तादेवतारक्षणेविनियोगः ॐप्रजापतयेत्वापरिददामिदेवायत्वासवित्रेपरिददाम्यद्भ्यस्त्वौ
षधीभ्यः परिददामिद्यावापृथिवीभ्यांत्वापरिददामिविश्वेभ्यस्त्वाभूतेभ्यः परिददामिसर्वेभ्यः त्वाभूतेभ्यः परिद
दाम्यरिष्ट्याइत्यनेननमंत्रेण अथकुमारा अग्निंप्रदक्षिणीकृत्याचार्यस्योत्तरतउपविशति अथवैकल्पिकाव
सरणे पूर्वेणब्रह्मणेगमने उत्तरेणपात्रासादने द्वेपवित्रेपात्रमयीआज्यस्थाली पालाशपः समिधः।
प्रांचावाघारौ समिद्धमेआज्यभागौ पूर्णपात्रोदक्षिणा अग्रेरुजरतआसीनायगायत्रीप्रदानं अग्नयेसमामि

© Dharmartha Trust J&K. Digitized by eGangotri

ध्ममितिसमिदाधानं प्रथमामिद्वामात्रुः अन्याअपरिमिताः पताानैकल्पिकान्पदार्थानहंकरिष्ये ततोदेवताभिध्यानं तत्र
ऊं॰ प्रजापतिं इंद्र अग्निंसोमं अग्निं वायुं सूर्यं अग्नीवरुणौ अग्नीवरुणौ वरुणंसवितारंविष्णुंविश्वान्देवान्मरुतःस्वर्का
३८ न् वरुणंप्रजापतिं अग्निंस्विष्टकृतमाज्येनाहंयक्ष्येततोब्रह्मोपवेशनादिपर्युक्षणांतंकर्मकृत्वाब्रह्मान्वारब्धआचार्यः
प्रजापतयेस्वाहा इदंप्रजापतये इंद्रायस्वाहा इदमिंद्राय अग्नयेस्वाहा इदमग्नये सोमायस्वाहा इदंसोमाय भू
र्भुवःस्वरितिमहाव्याहृतीनांप्रजापतिरृषिः क्रमेणगायत्र्युष्णिकअनुष्टुप्छंदांसिअग्निवायुसूर्योदेवता उपनय
नहोमेविनियोगः ऊंभूःस्वाहा इदमग्नये ऊंभुवःस्वा इदंवायवे ऊंस्वःस्वाहा इदंसूर्याय त्वन्नोअग्रइतिवाम
देवऋषिः त्रिष्टुप्छंदः अग्नीवरुणौदेवतेहोमेविनियोगः ऊंत्वन्नोअन्त्मन्स्वाहा इदमग्नीवरुणाभ्यां सत्वन्नो
अग्रइतिवामदेवऋषिः त्रिष्टुप् अग्नीवरुणौ होमेविनियोगः ऊंसत्वन्नोम॰ पधिस्वाहा इदमग्नीवरुणाभ्यां
अयाश्चाग्रइत्यस्यवामदेवऋषिः बृहतीछंदः अग्निर्देवता होमेविनि ऊंअयाश्चा॰ षजं॰ स्वाहा इदमग्नये ये ३६

© Dharmartha Trust J&K. Digitized by eGangotri

तेऽशान्नमितिवामदेवऋषिः त्रिष्टुप्छन्दः वरुणः सविताविष्णुर्विश्वेदेवामरुतः स्वर्कादेवताहोः उंयेतेशतं स्वर्काः स्वा
हा इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यः स्वर्केभ्यश्चाउ उदुत्तममितिशुनःशेपऋषिः त्रिष्टुप्छन्दः वरु
णोदेवताहो उंउदुत्तमं स्यामस्वाहा इदंवरुणाय प्रजापतयेस्वाहा इदंप्रजापतये अग्नयेस्विष्टकृतेस्वाहा इद
मग्नयेस्विष्टकृते संस्रवप्राशने पवित्राभ्यांमार्जनं पवित्रप्रतिपत्तिः पूर्णपात्रदानोब्रह्मन् उपनयनोगतयाविः
हितेइदंपूर्णपात्रंतुभ्यमहंसंप्रददे प्रणीताविमोकः अथैनंब्रह्मचारिणमाचारिणमाचार्यो सं शास्तिब्रह्मचार्य
सीत्याचार्योवदति असानीत्याहकुमारः अपोऽशानेत्याचार्यः अश्नानीतिब्रह्मचारी कर्मकुर्विमाचार्योवदति
करवाणीतिब्रह्मचारी मादिवास्वाप्सीरित्याचार्योवदतिनस्वपानीतिब्रह्मचारी वाचंयच्छेत्याचार्योवदति यच्छा
नीतिब्रह्मचारी समिधमाधेहीत्याचार्योवदति आदधानीतिब्रह्मचारी अपोऽशानेत्याचार्यो अश्नानीतिब्रह्मचारी
अथास्मैब्रह्मचारिणेसावित्रीमन्वाहाचार्यः कथंभूतायब्रह्मचारिणेइत्यपेक्षायांउत्तरतोग्रेणैवस्थितायप्र

© Dharmartha Trust J&K. Digitized by eGangotri

यदङ्गुलोपविष्टायपादोपसंग्रहणपूर्वकमग्रमन्वायब्धाचार्यसमीक्षमाणायस्वयमपिसमीक्षितायब्रूयादाचार्यः
उं. कथंतुकारमाहत्यपूर्वकंप्रथमेयच्छः द्वितीयगर्द्धर्चेषुः तृतीयंसर्वांसहपठन्नाचार्यैब्रूयात् अत्रश्रमसदेवब्रह्मचा
३८ रिणः समिदाधाने तत्रप्रथमंतावद्दक्षिणहस्तेनाग्नेः संमुक्षणं संमुक्षणमिंधनप्रक्षेपोवक्ष्यमाणैः पंचभिर्म
न्त्रैः अग्नेसुश्रवइत्यादीनांब्रह्माऋषिः यजूंषिअग्निर्देवतासमिंधनेविनियोगः ॐअग्नेसुश्रवः सुश्रवसंमाकुरु । य
थात्वमग्नेसुश्रवः सुश्रवाअसि एवंमां सुश्रवसौश्रवसंकुरुयथात्वमग्नेदेवानांयज्ञस्यनिधिपाअसि एवम
हंमनुष्याणांवेदस्यनिधिपोभूयासमितिप्रतिमंत्रमादधाति एकैकं अग्नेसुश्रवः एवंमां सुश्रवएवमहंम
नुष्याणांवेदस्यनिधिपोभूयं इतित्रिभिर्मंत्रैरग्नेः संमुक्षणंइत्येति ततःप्रदक्षिणमग्निंपर्युक्ष्यास्यायसमिध
मादधाति अग्नयेसमिधमित्यस्यमंत्रस्यप्रजापतिऋषिः आकृतिश्छंदः समिद्देवतासमिदाधानेविनियोगः
ॐअग्नयेसमिधमहार्षंबृहतेजातवेदसेयथात्वमग्नेसमिधासमिध्यसएवमहमायुषामेधयावर्चसाप्रजयापशु- ३२

भिर्ब्रह्मवर्चसेन समिधे जीवपुत्रो मम माचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी भेजस्वी ब्रह्मवर्चस्यन्नादो भूया
सं स्वाहेत्यनेन मन्त्रेण ततोऽनेनैव मन्त्रेण द्वितीयां समिधमादध्याति अनेनैव तृतीयां एषांतइति वा समिदाध्या
नमन्त्रः मन्त्रसमुच्चयो वा ततउपविश्य पूर्ववदग्ने सुश्रवः इत्यादिभिर्मन्त्रैरग्निं सधुक्ष्य पर्युक्षणं कृत्वा तत स्वीया
णी प्रतप्य वक्ष्यमाणैः सप्तभिर्मन्त्रैः प्रतिमन्त्रं मुखं विमार्जनं तनूपा अग्न इत्यादीनां हरदेवा ऋषयः यजूंषि अग्नि
देवता मुखविमर्शने विनियोगः तनूपा अग्नेऽसि तन्वं मे पाहि आयुर्दा अग्नेऽस्यायुर्मे देहि वर्चोदा अग्नेऽसि वर्चो मे
देहि अग्ने यन्मे तन्वा ऊनं तन्म आपृण मेधां मे देवः सविता आदधातु मेधां मे देवी सरस्वती आदधातु मेधा
मश्विनौ देवावाधत्तां पुष्करस्रजाविति सप्तमन्त्रैः मुखविमार्जनमन्त्राः अत्राशिष्टाचारपरिप्राप्ताः केचन पदार्था लि
खिता अङ्गानि च म इत्यादीनां प्रजापतिऋषिः यजुः लिङ्गोक्तादेवता अङ्गाप्यायने विनियोगः अङ्गानि च म आप्या
यन्तामित्यनेन मन्त्रेण सर्वाङ्गालम्भने वाक्च म आप्यायतामिति मुखालम्भने प्राणश्च म आप्यायतामिति नाऽ

© Dharmartha Trust J&K. Digitized by eGangotri

सिकालंभनं चक्षुस्तमस्याप्यायतामिति चक्षुषोरालंभनं श्रोत्रंत्वमस्याप्यायतामिति दक्षिणश्रोत्रालंभनं ततो ऽ
ॐ. नेनैव मंत्रेण वामश्रोत्रालंभनं पशोर्वनेचस अस्याप्यायतामिति मंत्रपाठमात्रं ततस्त्र्यायुषकरणं त्र्यायुषमिति ना
३८ रायणऋषिः उष्णिकछंदः लिंगोक्तादेवता भस्मनातिलककरणे विनियोगः भस्मनाललाटे ग्रीवायां दक्षिणे
से हृदि च त्र्यायुषमिति प्रतिमंत्रो ततः स्वगोत्रनामपूर्वकवैश्वानरादीनामपूर्वकवैश्वानरादीनामपूर्वकवैश्वा
नरादीनामपूर्वकवैश्वानरादीनामभिवादनं तद्यथा काश्यपगोत्रः काश्यपावत्सारानैध्रुवेति त्रिःप्रवरः
यज्ञदत्तशर्माहं भो वैश्वानरं अभिवादयामि एवं वरुणं आचार्यं च अभिवाद्य गुर्वादीन् आयुष्मान्भव सौम्य
श्रीधरशर्मन्नु भो ३ इति प्रत्यभिवादयेत् तत्र पित्राद्यभिवादने विधिः नीवोत्तानेन दक्षिणपाणिना दक्षिणपा
दे गृहीत्वा तातहं भोऽभिशिरः पादयोर्निदध्यात् अथ भिक्षाचरणे तत्र भवति भिक्षां देहीत्युक्त्वा ब्राह्मणो भिक्षां या
चते भिक्षां भवति देहीति क्षत्रियः भिक्षां देहि भवतीति वैश्यः यत्र प्रत्याख्यानेन कुर्वन्ति तत्र भिक्षार्थं गच्छेत् तिस्रो ३८

© Dharmartha Trust J&K. Digitized by eGangotri

वाभिक्षाग्राह्याः षट्द्वादशाब्दपरिमिता वा मोंजुः सकाशात्त्र्यमेभिक्षा यावते एके आचार्या मन्यन्ते एवं यथोक्ताभि
क्षिताआचार्यायिनसे निवेदयेत् अदत्ते सा आचार्यानुज्ञातो भिक्षां स्वीकुर्यात् वाग्यतो वाऽहःशेषमासीत स्वयं प्र
शीर्णाः समिध आहृत्य आस्मिन्नेतस्मिन्नेवाग्नौ परिसमूहनादि आयुषकरणं तेन समिदाधानं पूर्ववत् कुर्यात् त
तो वाग्विसर्गो वा अतआरभ्य ब्रह्मचर्ये समासे ब्रह्मचारिणो नियमा कथ्यन्ते अधः शायी स्यात् अक्षारलव
णाशी स्यात् दंडधारणं कर्तव्यं अरण्यात्स्वयं प्रशीर्णाः समिध आहृत्य सायंप्रातः संध्योपासनं कृत्वा परिस
मूहनादि यथोक्तं अग्निपरिचरणं कुर्यात् गुरुशुश्रूषा च कर्तव्या स्वाध्यायाविरोधेन सायंप्रातर्भिक्षाभोजना
र्थं कुर्यात् मधुमांसाशनं न कर्तव्यं स्त्रिजनेन न कर्तव्यं उद्धृतोदकेन स्नानादिस्यर्थ्यैः आसनस्योपरि मसूरिका पु
पधानं कृत्वा नोपविशेत् स्त्रीणां मध्ये अवस्थानं न कर्तव्यं अदत्तं न गृह्णीयात् अनृतं न वदेत् स्वस्त्येन तरोग
काद्य नियमा अनुष्ठेयाः यस्यैवम् अध्यवसायः ब्रह्मचारिणो वेदा मया परिपठितव्याः सोऽष्टाचत्वारिंशन्ते वर्षाणि वेद

© Dharmartha Trust J&K. Digitized by eGangotri

ब्रह्मचर्यं चरेत् अस्मिंश्च पक्षे च तु सर्वेषामपि वेदानामेकस्य च व्रतादेशः सर्वाश्च वेदाङ्गतयो होतव्याः स्वशाखायाः पूर्व
ऊं. कं पठनमपि प्रथमं स्वशाखायाः द्वादश द्वादश वर्षाण्येकैकस्य वेदस्य वेदस्य वेदब्रह्मचर्यं चरेत् अस्मिन्पक्षे वेदा
३५ रंभकाले च वेदाङ्गतयो होतव्याः पृथक्पृथक् पावनाकालेन वेदग्रहणे समर्थः स्यादेवं ते। कालमेकैकस्य वेदब्रह्मच
रेत् ब्राह्मचारिणः शाणमयं वासो भवति परिधानीयं क्षत्रियस्य क्षौमं आतसमित्यर्थः आविकं वैश्यस्य ऐणेय
39 मजिनमुत्तरीयं ब्राह्मणब्रह्मचारिणः ऐणेयमिति हरिण्याश्चर्मोच्यते रौरवं चित्रमृगस्योत्तरीयं राजन्यस्याजं ग
व्यं वा चर्म वैश्यस्य ब्रह्मचारिण उत्तरीयं ऐणेयादिचर्माभावे सर्वेषामेव ब्राह्मणादीनां गव्यमेव चर्मोत्तरीयं भवं
ति मौञ्जी रशना ब्राह्मणस्य ब्रह्मचारिणो भवति धनुर्ज्या राजन्यस्य धनुर्ज्यार्थं त्रिगुणः मौर्वी वैश्यस्य रश
ना भवति मुञ्जाभावे कुशमयी रशना ब्राह्मणस्य भवति अश्मन्तकमयी राजन्यस्य वील्वजी वैश्यस्य पा
लाशो ब्राह्मणस्य दण्डो भवति वैल्वो राजन्यस्याश्वो डुम्बरो वैश्यस्य सर्वे वा सर्वेषां ब्राह्मणादीनामनियमे ३५

नदंडाभवंति आचार्येण हूतः सन् उत्थाय प्रतिवचनं ददाति ब्रह्मचारी तत्र यदि शयानं ब्रह्मचारिणमाह्वयत्या
चार्यस्तदा उपविष्टो भूत्वा प्रतिवचनं ददाति आसीनमनुपविष्टं चेदाह्वयति तदा तिष्ठन् प्रतिवचनं दद्यात् तिष्ठंत
चेदाह्वयति तदा अभिमुखं क्रामन् प्रतिवचनं दद्यात् अभिक्रामंतं चेदाह्वयति अभिमुखं क्रामन् प्रतिव
चनं धावन् प्रतिशृणुयात् यथोक्त चारिणा ब्रह्मचारिणः फलकथनं स य एवं वर्तमानो मुत्रायं वसत्यमुत्राय व
सतीति तस्य स्नातकस्य कीर्तिर्भवेत् त्रयः स्नातका भवंति विद्यास्नातको व्रतस्नातको व्रतस्नातको विद्याव्रत
स्नातको विद्याव्रतस्नातक इत्येषां लक्षणमाह समाप्य वेदमसमाप्य व्रतं यः समावर्तते स विद्यास्नातकः स
माप्य व्रतमसमाप्य वेदं यः समावर्तते स व्रतस्नातक इति उभयं व्रतं वेदं च समाप्य यः समावर्तते स विद्याव्रतस्ना
तकास्त इति व्रतप्रोक्तेनात्र एकैकस्य वेदस्य द्वादशवार्षिकं ब्रह्मचारिव्रतवरणमुच्यते अर्वाक् षोडशायां
ब्राह्मणस्यानतीजपवकालो भवत्युपनयनस्य आद्वाविंशाद्राजन्यस्य आचतुर्विंशाद्वैश्यस्यानुय।

© Dharmartha Trust J&K. Digitized by eGangotri

नीतो ब्राह्मणः षोडशे वर्षे पतितसावित्रीको भवति द्वाविंशे राजन्यः चतुर्विंशे वैश्यः पतितसावित्रीको भव
डों. ति व्रातश्चैते तान्पतितसावित्रीकान्नोपनयेयुर्नाध्यापयेयुर्न याजयेयुर्नैभिः सह व्यवहारेनिति यस्य कर्मणो यः
४० कालउक्तस्तदतिक्रमेऽनादिष्टप्रायश्चित्ते कृत्वा तत्कर्म कर्तव्यं भूः स्वाहा भुवः स्वाहा स्वः स्वाहा भूर्भुवः स्वः स्वा
हा त्वन्नोऽग्ने स त्वन्नोऽग्ने अयाश्चाग्ने येते शतं उदुत्तमामित्येतदनादिष्टप्रायश्चित्ते नात्र ब्रह्मोपवेशनादिकर्त
40 व्या किं तु पूर्णाहुतिवदाज्यं कृत्य कर्तव्ये निरुप्याज्यं अग्नावधिश्रित्य स्रुक्स्रुवं दर्भैः संमृज्योद्वास्योत्पूयायेद्धेति ति
ष्ठन्समिदाध्मय स्रुवेण जुहुयात् कालातिक्रमे मुख्यकाम्यस्मिन्नपि कर्मणि पाते एवं तदेव प्रायश्चित्तं भवति
क्रिष्टुहृषे पतितसावित्रिकाणामपत्यसंस्कारः अध्यापनं चतेयां न भवति तेषामथ्येयः संस्कारमिच्छति स
ब्राह्मस्तोमेनेष्ट्वा व्यवहार्यो भवति एष प्रयोगः स्वस्वकालकृतपूर्वसंस्कारस्य असंस्कृतस्य तु विशेष उच्यते आ
चार्यः उपनयनात्पूर्वदिने वटुना सह मंगलस्नानः प्राणानायम्य तिथ्यादि संस्कारस्य असंस्कृतस्य तु । कीर्त्य मम ४०

© Dharmartha Trust J&K. Digitized by eGangotri

कुमारस्य गर्भाधान पुंसवन सीमन्तोन्नयन जातकर्म नामकरण निष्क्रमणान्नप्राशन चौल कर्मणां नानासंस्काराणां का
लातिपत्तिदोषपरिहारद्वारा परमेश्वरप्रीत्यर्थं प्रायश्चित्त होमं करिष्ये इति संकल्प्य महाव्याहृत्यादि प्रायश्चित्त होमे
समाप्य चौलातिरिक्तसंस्काराणां प्रमादादकरणे प्रत्येकं पादकृच्छ्रं चौलाकरणे अर्धकृच्छ्रं बुद्धिपूर्वं चौलातिरिक्तकरणे
प्रत्येकमर्धकृच्छ्रं चौलाकरणे कृच्छ्रं वटुना कारयेत् अशक्तौ तत्प्रत्याम्नायत्वेन गोदान तिलाहुति सहस्रगायत्रीज
प द्वादशब्राह्मणभोजनादिष्वेकं प्रायश्चित्तं कारयित्वाऽतीतानि जातकर्मादीनि कृत्वा पूर्वोक्तप्रकारेणोपनयन
तन्त्रेण समावर्तेत् उपनयनेन सह चौलकरणपूर्वेद्युः संस्कारद्वये संस्कार्ये युगपत्स्वस्तिवाचनमंडपस्थापन
नान्दीश्राद्धानि कृत्वा पूर्वेद्युर्मंगलस्नानादि पूर्वोक्तं चौलप्रयोगं सर्वं कृत्वा पुनरश्वमित्यादि संकल्पः उपनयनसं
कल्पादि उपनयने कार्यं इत्युपनयनप्रयोगः अथोपनयनानन्तरं पुण्याहनिश्चावाचार्यो वेदारंभनिमित्तं मातृपू
जापूर्वकमाभ्युदयिकं श्राद्धं कृत्वा शुचौ देशे यं च भूसंस्कारान् कृत्वा लौकिकाग्निं स्थापयेत् ततः प्राणानायम्य दे

© Dharmartha Trust J&K. Digitized by eGangotri

प्राकालोऽस्तत्वाअस्यब्रह्मचारिणोयज्ञवेदे शेषंचमसंस्कारान्कृत्वालौदारंभमहंकरिष्ये अथवैकल्पिकानि पक
ड्रो॰ वेदस्यारंभः पूर्वेणब्रह्मणोगमने उत्तरेणपात्रासादनोदेपवित्रोतान्नमयीआज्यस्थाली पालाश्यः समिधः प्रो॰
४२ वावाघारौ समिद्धतमेआज्याभागौ पूर्णपात्रेदक्षिणा एतान्वैकल्पिकान्पदार्थानहंकरिष्ये अथदेवताभिध्या
ने तत्रप्रजापतिं इंद्रं अग्निं सोमं अंतरिक्षंवायुं ब्रह्माणं छंदांसि प्रजापतिं देवान् ऋषीन् श्रद्धां मेधांस
दसस्पतिं अनुमतिं अग्निं वायुं सूर्यं अग्नीवरुणौ अग्नीवरुणौ अग्निं वरुणंसवितारंविष्णुंविश्वान्देवान्म
रुतः स्वर्कान् वरुणं प्रजापतिं अग्निंस्विष्टकृतं एतादेवताअग्गप्रधानाथ्योआज्येनास्मिन्कर्मणापहेयक्ष्यो
ततोब्रह्मोपवेशनादिआज्यभागांतेकृत्वा अंतरिक्षायस्वाहा इदमंतरिक्षाय वायवेस्वाहा इदंवायवे ब्रह्म॰
णेस्वाहा इदंब्रह्मणे छंदोभ्यःस्वाहा इदंछंदोभ्यः प्रजापतयेस्वाहा इदंप्रजापतये देवेभ्यःस्वाहा इदंदेवेभ्यः
ऋषिभ्यःस्वाहा इदंऋषिभ्यः श्रद्धायैस्वाहा इदंश्रद्धायै मेधायैस्वाहा इदंमेधायै सदसस्पतयेस्वाहा इदंस ४२

© Dharmartha Trust J&K. Digitized by eGangotri

दसस्पतये अनुमतयेस्वाहा इदमनुमतये भूर्भुवः स्वरितिमहाव्याहृतीनां प्रजापतिऋषिः क्रमेणगायत्र्युष्णि
गनुष्टुप्छन्दांसि अग्निवायुसूर्यादेवताः वेदारंभांगहोमेविनियोगः भूः स्वाहा इदमग्नये भुवः स्वाहा इदंवा
यवे। स्वः स्वाहा इदंसूर्याय त्वन्नः अग्नइतिवामदेवऋषिः त्रिष्टुप्छन्दः अग्नीवरुणौदेवतेहोमेविनियोगः ॐत्वन्नो
स्मात्स्वाहा इदमग्नीवरुणाभ्यां सत्वन्नोअग्नइतिवामदेवऋषिः त्रिष्टुप्छन्दः अग्निवरुणौदेवतेहोमेविनियोगः ॐ
सत्वन्नो० एधिस्वाहा इदमग्नीवरुणाभ्यां सत्वन्नोअग्नइतिवामदेवऋषिः त्रिष्टुप्छन्दः अग्निवरुणौदेवतेहोमे०
विनियोगः ॐअयाश्चाग्नइतिवामदेवऋषिः बृहतीछन्दः अग्निर्देवता ॐअयाश्च० षजं स्वाहा इदमग्नये येते
शतमितिवामदेवऋषिः त्रिष्टुप्छन्दः वरुणः सविताविष्णुर्विश्वेदेवामरुतः स्वर्कादेवताहो ॐयेतेशतं० स्व
र्कादेवताहो ॐयेतेशतं स्वार्काः स्वाहा इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यः स्वर्केभ्यश्च उदु
त्तमामितिशुनःशेपऋषिः त्रिष्टुप्छन्दः वरुणोदेवताहोः ॐउदुत्तमंस्यामस्वाहा इदंवरुणाय प्रजापत

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ
८२
42

येस्वाहा इदंप्रजापतये अग्नयेस्विष्टकृतेस्वाहा इदमग्नयेस्विष्टकृते ततः संस्रवप्राशनं पवित्राभ्यां मार्जनं
पवित्रप्रतिपत्तिः ब्रह्मन्वेदारंभो गमत्त इदं पूर्णपात्रं तुभ्यमहं संप्रददे प्रणितानां विमोकः यदि ऋग्वेदमध्ये
ष्यमाणः तदाज्यभागांते पृथिव्यै स्वाहा इदं पृथिव्यै अग्नये स्वाहा इदमग्नये ब्रह्मणइत्यादि स्विष्टकृदं
तं जुहोति सामवेदं चेत्तदा दिवे स्वाहा इदं दिवे सूर्याय स्वाहा ब्रह्मण इत्यादि पूर्ववत् यद्यथर्ववेदो तदा दिग्भ्यः
स्वाहा इदं दिग्भ्यः चंद्रमसे स्वाहा इदं चंद्रमसे ब्रह्मण इत्यादि पूर्ववत् यद्येकदा सर्ववेदारंभस्तदा प्रतिवेदं वेदा
हुतिर्द्वयं हुत्वा ब्रह्मणे छंदोभ्य इत्याहुतिद्वयं होतव्यं ततः प्रजापतये इत्याद्याः सप्ताहुतयः स्रुवेण ततो म
हाव्याहृत्यादि स्विष्टकृदंतादशाहुतयः ततः संस्रवप्राशनं ततः गणेशं सरस्वतीं लक्ष्मीं हरिं विद्यां वि
प्रादिपूजयेत् पूर्णपात्रस्य ब्रह्मणे दानं ततो वेदारंभः प्रत्यङ्मुखायोपविष्टायाचार्यः प्राङ्मुख आसीनो यज्ञ
मेखलब्रह्मचारी ... ायोपयत्रायग्रजवेयतायोनसूषकाय स्वहस्तो जानुभ्यां परिकृताय ब्रह्मचारिणे वेदमध्य ८२

इति तथाद्य प्रणवंप्राक्प्रयुंजीतव्याहृतीस्तदनंतरं सावित्रींचानुपूर्व्येणततोवेदादिमारभेत् प्रणवंचादावंतेचकुर्यात्
आरंभेचावसानेचब्रह्मचारीगुरोःपादोपसंग्रहणंकुर्यात् एवंस्वशाखामधीत्यपरशाखांवापठेत् अस्कंदयंस्तथारेतो
वासुदेवपरायणः मुंडोवाजटिलोवास्यादथवास्याच्छिखाजटी एवंसतियदिकामतोरेतःस्कंदतितदास्पृथ्यार्थेनैर्ऋ
तंगर्दभयागंआज्याहुतिंवाकुर्यात् स्वमेदेदकामतोरेतःस्कंदेत्तदास्नातामर्कंयेप्रजपित्वापुनर्मनइतित्रिर्जपेत् य
दिगुरोःकार्यवशात् दैवात्सप्तरात्रंभिक्षालोपोभवति अग्निपरिचर्याविलुप्तावातदाअवकीर्णिव्रतंचरेत् उपवी
तादिनाशेमनोज्योतिरित्यादिकामाहुतिंजुहुयात् संध्याग्निकार्यलोपेस्नात्वागायत्र्यष्टसहस्रंजपेत् स्वस्थोयदि
भिक्षांनकुर्यात्तदागायत्र्यष्टशतंजपेत् मधुमांसभक्षणेकृच्छ्रमेकंचरेत् दंडोपवीताजिनमेखलानांलोपेआज्ये
नव्याहृतिहोमंकुर्यात् ततःप्राणनायम्यविधिवद्धारयेत् इतिवेदारंभप्रकरणम् अथगोदानप्रयोगः ज
न्मतःसप्तदशेवर्षेनोवेद्धृतविसर्गात्पूर्वंकालापकर्षेत्कृत्वाउदगयनेशुक्लपक्षेवालोक्तेतिथ्यादौगोदानं

© Dharmartha Trust J&K. Digitized by eGangotri

कुर्यात् तत्र पूर्वेद्युराचार्यः कृतनित्यक्रियं वटुं दक्षिणतउपवेश्य प्राणानायम्य देशकालौ स्मृत्वा अस्य ब्रह्मचारिणः के
डों. शान्तमहं करिष्ये तदंगतया गणेशपस्थापनं मातृकापूजनं वसोर्धाराकरणं नान्दीश्राद्धं च करिष्य इति प्रत्येकं संकल्प
४२ तानि क्रमेण कृत्वा परेद्युः कृतनित्यक्रियं वटुं दक्षिणतउपवेश्य मुहूर्ते उपलेपनान्ते कृत्वा पुनर्देशकालौ स्मृत्वा
43 अस्य केशान्तमहं करिष्ये तत्र वैकल्पिकावधारणे पूर्वेण ब्रह्मणो गमनं उत्तरेण पात्रासादनं द्वे पवित्रे ताम्रम
यी आज्यस्थाली पालाश्यः समिधः प्रोक्षणाद्याघारौ समिद्धतमे आज्यभागौ पूर्णपात्रं दक्षिणा त्रिरात्रं ब्रह्मचर्यं घृत
पिण्डः सकेशगोमयपिण्डस्य गोष्ठे निखननं एतान्वैकल्पिकान्पदार्थानहं करिष्ये अथ देवताभिध्यानं तत्र प्र
जापतिं इन्द्रं अग्निं वायुं सूर्यं अग्नीवरुणौ अग्नीवरुणौ अग्निं वरुणं सवितारं विष्णुं विश्वान्देवान् मरुतः स्व
र्कान् वरुणं प्रजापतिं अग्निं स्विष्टकृतं एता आज्येन अस्मिन्कर्मण्युपहेयदेवताः ततो ब्रह्मोपवेशनाद्याज्यभा
गान्ते विशेषः नात्र नखाः आसादनानन्तरमुपकल्पनीयानि शीतोदकं उष्णोदकं घृतपिण्डो त्रेणी शलली स ४२

© Dharmartha Trust J&K. Digitized by eGangotri

प्रविशनिकुशान्तरूणानि तान्त्रपरिस्तृणत्पायसः त्वरः आनडुहगोमयपिंडं नापितस्य अत्रगौरेववरः एतानुप
कल्प्यपवित्रेकृत्वाप्रोक्षणीसंस्कारादिपर्युक्षणांतेहुत्वा प्रजापतयेस्वाहा इदंप्रजापतये इंद्रायस्वाहा इदमि
न्द्राय अग्नयेस्वाहा इदमग्नये सोमायस्वाहा इदंसोमाय ततोमहाव्याहृत्यादिस्विष्टकृदंतंजुहुयात् ततःसं
स्रवप्राशने पवित्राभ्यांमार्जनं पवित्रप्रतिपत्तिः पूर्णपात्रदानं ब्रह्मन्केशांतहोमांगतयाविहितेदंपूर्णपात्रंतु
भ्यमहंसंप्रददे प्रणीताविमोकः ततःशीतास्वद्भिरुष्णाआपआसिंचति उष्णेनवायउदकेनेहि अदितेकेशश्मश्रुवपेनिविशे
षः त्रिःक्षुरेणशिरःप्रदक्षिणंसमुखंपरिहरणं यत्क्षुरेणःशिरोमुखमास्यायुःप्रमोषीः अन्यत्सर्वंचूडादिकंचू
डाकरणवत् ततःआचार्यायगांदद्यात् क्षिराणेब्रह्मचर्यादिति केशांतप्रयोगः अथब्राह्मवाविलुप्तलोपेप्राय
श्चित्तं तत्रबौधायनः अत्रशौचाचमनसंध्यावेदनदर्भभिक्षाग्निकार्यराहित्यशूद्रस्त्रीस्पर्शनकौपीनक
टिसूत्रयज्ञोपवीतमेखलादंडाजिनत्यागदिवास्वापछत्रधारणपादुकाध्यारोहणमालाधारणोद्वर्तनानुले

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ
४४
44

पनोंजनजलक्रीडाद्यूतनृत्यगीतवाद्याभिरतिपादुकादिसेवनः स्त्रीप्रेक्षितभोजनादिब्रह्मचारिव्रतलोपसकल
दोषपरिहारार्थंब्रह्मचारीकृच्छ्रत्रयंचरे महाव्याहृतिहोममेवकुर्यात् तद्यथालौकिकाग्निंप्रतिष्ठाप्यब्रह्मवरणाद्या
ज्यभागान्तेकृत्वाप्रथममेवसमस्ताभिर्व्याहृतिभिस्तत्स्वाज्याहुतीर्हुत्वाततोभूरग्नयेचपृथिव्यैचमहतेस्वाहाभुवो
वायवेचान्तरिक्षायचस्वाहा ६ ॐस्वरादित्यायचदिवेचमहतेस्वाहा ७ ॐभूर्भुवःस्वश्चन्द्रमसेचनक्षत्रेभ्यश्चदिग्भ्यश्च
महतेचस्वाहा ८ ॐपाहिनोअग्नएनसेस्वाहा ९ ॐपाहिनोविश्ववेदसेस्वाहा १० ॐयज्ञंपाहिविभावसोस्वा
हा ११ ॐसर्वंपाहिशतक्रतोस्वाहा १२ पुनरूर्जानिवर्तस्वस्वाहा १३ ॐसहरय्यास्परिस्वाहा १४ पुनर्व्याहृतिभि
र्हुत्वास्विष्टकृदादिहोमशेषंसमापयेदिति एतदल्पधर्मलोपेप्रायश्चित्तं बहुधर्मलोपेतुप्रायश्चित्तंविशेषक
विष्णवेशौनकेनोक्तः तेवोषियाजपेन्मंत्रंलक्षंवैत्र्याशिवालये ब्रह्मचारिस्वधर्मंचहर्षमेवनतदिति महा
नाघ्नादिव्रतेषुलक्षेतारतम्येनत्रीन्षड्द्वादशवाकृच्छ्रान्कृत्वापुनर्व्रतंप्रारभेदितिस्मृत्यर्थसारे इतिप्रयो ४४

© Dharmartha Trust J&K. Digitized by eGangotri

गारत्रेव ब्रह्मचारिव्रतलोपे माणवस्य प्रायश्चित्ते पुनः संस्कारे विशेषमाह मनुः अजिनं मेखला दंडो भैक्षचर्या व्रतानि च निवर्त्तं
ते द्विजातीनां पुनः संस्कारकर्मणीति इह द्विस्तरथा ह्यावपने मेखला दंडो भैक्षचर्या व्रतानि वा निवर्त्तन्ते द्विजातीनां पु
नः संस्कारकर्मणीति निमित्तिके पुनरुपनयने याज्ञवल्क्येनोक्तं अज्ञानात्तु सुरां पीत्वा रेतो विण्मूत्रमेव वा पुनः सं
स्कारमर्हन्ति त्रयो वर्णा द्विजातय इति पुनः संस्कारस्य पुनरुपनयने तत्राश्वलायनमुक्तप्रकारेण कर्तव्यं यथोक्तं अ
थापेत पूर्वस्य कृताकृतं केशवपनं मेधाजननं चानिरुक्तं परिदानं कालश्च तत्सवितुर्हणीमह इति सावित्रीमिति
अथ समावर्त्तनम् तत्र वेदं मंत्रब्राह्मणात्मकं समाप्य सम्यक्पाठतः अर्थतश्च स्नायात् अथवा ब्रह्मचर्यव्रतं अ
ष्टाचत्वारिंशके द्वादशवर्षं वा समाप्यैतद्व्रतं स्नायादिति पदतः तर्कोऽर्थवाद इति कर्कोपाध्यायाः तर्को मीमांसेति क
ल्पतरुकारः षडंगसहितं वेदमधीत्य स्नायात् मंत्रं वा ब्राह्मणं वाधीत्य स्नायात् पदेऽर्थमात्रमधीत्य यश्च वि
धावाभ्यस्य स्नायात् मंत्रब्राह्मणात्मकं वेदमधीत्यावबुध्य च स्नायात् ब्रह्मचारी गुरवे अथ दानेन संपूज्य तेनानुज्ञाः

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ
४५

45

तो ज्योतिर्विद्भिः शुभकाले आवासीट देहे समावर्तनं नाम कर्म कुर्वीत् । ब्रह्मचारी कृतनित्यक्रियः कृतप्रातरग्निकार्य
श्च ततश्चाचार्यः प्राणानायम्य देशकालौ संकीर्त्य अस्य ब्रह्मचारिणः गृहस्थाश्रमोत्तरप्राप्तिद्वारा श्रीपरमेश्वरप्री
त्यर्थं समावर्तनाख्यं कर्म करिष्य इति संकल्प्य तदङ्गभूतं निर्विघ्नार्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं मातृका
पूजनं नान्दीश्राद्धं वा हं करिष्ये आह्वादि समाप्य । ततश्चाचार्यो ब्रह्मचारिण्यस्य इत्युक्ते स्वाहीनि प्रत्यनुरागदोः ततः सदो
पसत्रहणं सूहनं । ततः परिस्थिते पंचभूसंस्कारान् कृत्वा लौकिकाग्नेः स्थापनं अथ विकल्पः वधारणं पूर्वेण ब्रह्म
णो गमनं उत्तरेण पात्रासादनं दैवविधिः ताम्रमयी आज्यस्थाली पालाशः समिधः प्रोक्षणी वा स्रुवो समिद्भिर्मे
आज्येनाग्नेयं पूर्णाहुतिं दक्षिणा वेदाध्ययनानन्तरं समावर्तने दधिप्राशने गां गोस्वामिने स्वस्त्ये एताहैकालिका
न्यदार्थीमहं करिष्ये अथ देवताभिध्यानं तत्र प्रजापतिं इन्द्रं अग्निं सोमं अथ प्रधानदेवताः त्वं तदि
वायुं वलाणं द्विदोसि प्रजापतिं देवान् ऋषीन् श्रद्धां मेधां सदसस्पतिं अनुमतिं इतियजुर्वेदयवला ४५

© Dharmartha Trust J&K. Digitized by eGangotri

नेतस्समावर्तं नेयदावेदस्वयंपदितावे अदस्वयंपदितावेदव्रतस्वयंमठितावासमावर्त्तै नेतदातनस्के दंदेवताभि धानंतत्त्वेददेवता
होमवेदातेअवकुर्यात् अग्निं वायुं सूर्यं अग्नीवरुणौ अग्नीवरुणौ अग्निं वरुणं सवितारं विश्वेविश्वान्देवान्मरुतः स
र्वान् वरुणं प्रजापतिं अग्निंस्विष्टकृतं एताआज्येनअस्मिन्कर्मण्यहंयक्ष्ये ततः ब्रह्मवरणंआज्यभागांतेविशेषः
पात्रासादनेउपकल्पनीयेषुसमिद्भिन्नकाष्ठानिसमिधः पर्युक्षणार्थंउदकं हवितानकुशान् अंशैरुपलिंग
मान् श्रौडंवरंद्वादशांगुलंदंतकाष्ठं दधि नापितं स्नानचारि उद्वर्तनद्रव्यं चंदनं अक्षतंवाससीयज्ञोपवीते
पुष्पाणि उष्णीषं कर्णालंकारौ अंजनं दर्पणं नूतनं नूतनंछत्रं उपानहौ वेणुदंडो पामध्याद्वेवेति ततः
पवित्रकरणादिपर्युक्षणांतंकुर्यात् प्रजापतयेस्वाहा इदंप्रजापतये इंद्रायस्वाहा इदमिंद्राय अग्नयेस्वाहा इद
मग्नये सोमायस्वाहा इदंसोमाय अंतरिक्षायस्वाहा इदमंतरिक्षाय वायवेस्वाहा इदंवायवे ब्रह्मणेस्वाहा इ
दंब्रह्मणे छंदोभ्यस्वाहा इदंछंदोभ्यः प्रजापतयेस्वाहा इदंप्रजापतये देवेभ्यःस्वाहा इदंदेवेभ्यः ऋषिभ्यः

© Dharmartha Trust J&K. Digitized by eGangotri

स्वाहा इदंऋषिभ्योनमम श्रद्धायैस्वाहा इदंश्रद्धायै मेधायैस्वाहा इदंमेधायै सदसस्पतयेस्वाहा इदंसदस
ओं॰ स्पतये अनुमतयेस्वाहा इदंअनुमतये यदिऋग्वेदमधीत्यस्नानंकरोतितदापृथिव्यैस्वाहा इदंपृथिव्यै अग्नये
४९ स्वाहा इदमग्नये इत्याहुतिद्वयंहुत्वाब्रह्मणेछंदोभ्यइत्यारभ्यानुमत्यंतानवाहुतीर्जुहोति एवंसामवेदेदिवेस्व
48 र्यायेत्याहुतिद्वयंहुत्वाब्रह्मणइत्याद्याः नवाहुतीर्जुहोति एवमथर्ववेदेदिग्भ्यःइदमसइत्याहुतिद्वयंहुत्वाब्रह्म
णेइत्याद्याजुहोति एवंवेदचतुष्टयस्याधीत्यस्नानंकरोतितदाआज्यभागान्तेनवप्रतिवेदंवेदाहुतिद्वयंहुत्वा
ब्रह्मणेछंदोभ्यइत्याद्याहुतिपुनःपुनर्जुहोति ततःप्रजापतयइत्यास्यानुमत्यंताः समाहुतीर्जु
होति एवंवेदद्वयत्रयाध्ययनेपियोज्यंभूर्भुवःस्वरितिमहाव्याहृतीनांप्रजापतिऋषिः गायत्र्युष्णि
गनुष्टुप्छंदांसिअग्निवायुसूर्यादेवताः होमेविनियोगः भूःस्वाहा इदमग्नये भुवःस्वाहा इदंवायवे स्वः
स्वाहा इदंसूर्याय त्वंनोअग्नइतिवामदेवऋषिः त्रिष्टुप्छंदः अग्नीवरुणौदेवताहोमेविनियोगः त्वंल ४९

© Dharmartha Trust J&K. Digitized by eGangotri

न्द्रो॰ भुवः स्वाहा इदमग्नीवरुणाभ्यां॰ सत्वन्नो अग्ने इति वामदेव ऋषिः त्रिष्टुप् छन्दः अग्नीवरुणौ देवते होमे विनियो
गः ॐ सत्वन्नो॰ पृषि स्वाहा इदमग्नीवरुणाभ्यां अयाश्चाग्ने इति वामदेव ऋषिः बृहती छन्दः अग्निर्देवता होमे विनियो
गः ॐ अयाश्चाग्ने॰ ऽजः स्वाहा इदमग्नये ये ते शतम् इति वामदेव ऋषिः त्रिष्टुप् छन्दः वरुणसवितृविष्णुविश्वेदेवा
मरुतः स्वर्का देवता होमे विनियोगः ॐ ये ते शतं॰ स्वर्का॰ स्वाहा इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्व
र्केभ्यश्च उदुत्तमम् इति शुनःशेप ऋषिः त्रिष्टुप् छन्दः वरुणो देवता होमे विनियोगः ॐ उदुत्तमं॰ स्वाम॰ स्वाहा
इदं वरुणाय प्रजापतये स्वाहा इदं प्रजापतये अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते ततः संस्रव प्राशनं
पवित्रप्रतिपत्तिः ब्रह्मणे इदं पूर्णपात्रं तुभ्यमहं संप्रददे प्रणीताविमोकः ततः ब्रह्मचारी उपनेतृब्राह्मणस्सर्वके
गुरून् नमस्कृत्य परिसमूहनादि आज्योपकरणेन समिदाधानेन तस्मिन्नग्नौ वायो कुर्यात् ततः आचार्यपुरुषैः
परिश्रितस्योत्तरभागे स्थापितभाण्डं दक्षिणे तरा पात्रानां जलपूर्णैकतमानां पूर्वभागे आस्तृते पुरुषाग्रेषु

© Dharmartha Trust J&K. Digitized by eGangotri

कुम्भेषु उदङ्मुखः स्थित्वा येश्वंतरितिप्रजापतिरृषिः यजुः आपो देवता उदकग्रहणे विनियोगः येप्स्वन्तरग्नयः प्र
ॐ विष्टा गोह्य उपगोह्यो मयूखो मदो हारद्रुदूलो विहनस्वनुडुष्टुरिंद्रियहा तान्विजहानि यो गो वनस्व मिह ष्टह्यगामी
४८ त्यनेन मंत्रेण प्रथमकलशान् दक्षिणतलकेन जलमादाय तेनोदकेन स्वकीयां शिरोभिषिंचेत् तेन मामि
ति मंत्रस्य प्रजापतिरृषिः यजुः आपो देवता अभिषेचने विनियोगः तेन मामभिषिंचाम्यिन्द्रियेय प्राते ब्रह्म
णे ब्रह्मवर्चसायेति मंत्रेण जलग्रहणं तु अपरेभ्योपि सप्तभ्यो येश्वंतरग्नय इत्यनेनैव मंत्रेण अभिषेचनमे
त्रास्तद्वयवर्णयक पुनर्येश्वंतरग्नय इत्यनेन मंत्रेणोदकमादाय द्वितीयाउदकुंभात् येन श्रियमिति मंत्रस्य प्र
जापतिरृषिः यजुः आपो देवता अभिषेचने विनियोगः येन श्रियमकृणुतां येनावमृशतां यत्सुरां येना
क्षावभ्यषिंचतां यद्वां तदश्विना यश इत्यनेन मंत्रेण द्वितीयोदकुंभजलेनावभिषिच्य पुनर्येप्स्वंतरग्नय
इत्यनेनोदकमादाय तृतीयकुंभात् आपोहिष्ठेति सिंधुद्वीप ऋषिः गायत्री छंदः आपो देवता अभिषेच ४८

© Dharmartha Trust J&K. Digitized by eGangotri

नेविनियोगः आपो हि॰ महेरणाय चक्षसे इत्यनेन मंत्रेणाभिषिच्य पुनर्यैश्वेतरग्रय इत्यनेनोदकमादाय तद्घर्मा
त्कुंभात् योपःशि॰ मातर इत्यनेन मंत्रेणाभिषिच्य पुनर्यैश्वेतरग्र इत्यनेनोदकमादाय पंचमात्कुंभात् तत्स्मा
त्र॰ यथावन इत्यनन्यर्वा अभिषेकः ततो येश्वेतरग्रय इत्यनेन मंत्रेण षष्ठसप्तमाष्टमकुंभ्यः प्रत्येकमुदकमा
दाय तस्मीवारत्रयं अभिषिंचति उदुत्तममित्यस्य शुनःशेप ऋषिः त्रिष्टुप् छंदः वरुणो देवता मेखलोन्मोके
विनियोगः उदुत्तम॰ स्यामेति मंत्रेण मेखलां शिरोमार्गेण निःसार्य मेखलां भूमौ निधाय कृष्णाजिने चोत्ता
र्य दंडं त्यागं च कृत्वा वासोन्यत्परिधाय आदित्यमुपतिष्ठते उद्यन्भ्राजभृष्णुरितिमंत्रस्य प्रजापतिऋषिः अति
शक्करीछंदः आदित्यो देवता आदित्योपस्थाने विनियोगः उद्यन्भ्राजभृष्णुरिंद्रो मरुद्भिरस्थात्प्रातर्यावभिरस्था
द्दशसनिरसि दशसनिं मा कुर्वा विदन्मा गमय उद्यन्भ्राजभृष्णुरिंद्रो मरुद्भिरस्थाद्दिवायावभिरस्थाच्छतसनिर
सि शतसनिं मा कुर्वा विदन्मा गमय उद्यन्भ्राजभृष्णुरिंद्रो मरुद्भिरस्थात्सायं यावभिरस्थात्सहस्रसनिरसि सहस्रसनिं

© Dharmartha Trust J&K. Digitized by eGangotri

माकुर्वो विदन्मावामपेत्यनेन मंत्रेणादित्यमुपस्थापनतोदक्षिणाग्ने जटालोमनखानां निकृंतने स्नानंश्रो
ॐ डेवरकाष्ठेन दंतस्नवने अन्नाद्यायेति मंत्रस्याथर्वण ऋषिः अनुष्टुप्छंदः सोमोदेवता दंतधावने विनि
४८ योग अन्नाद्यायव्यूहध्वं सोमोराजायमागमत् समेमुखंप्रमाक्ष्यते यशसाच भगेनचेत्यनेन मंत्रेण
ततः सर्वोपिनाद्रव्येणोद्वर्तनेनोष्णानावेदनाघेतुलेपनेष्टहीनामुखवासिकपोरालेमनेप्राण यानाविति
48 मंत्रस्यप्रजापतिरृषिः यजुः प्राणापानौदेवते चंदनोपग्रहणेविनियोगः प्राणापानौमेतर्पयचक्षुर्मे
तर्पयश्रोत्रंमेतर्पयेत्यनेनमंत्रेण ततः पादावनेजनेकृत्वातदुदकमादायापसव्यंकृत्वादक्षिणामु
खोभूत्वातदुदकेदक्षिणस्यांदिशिनिषिंचतिपितरः शुंधध्वमितिप्रजापतिरृषिः यजुः अग्निनिसर
स्तीडादेवताः पादावनेजनस्यदक्षिणस्यांदिशिनिषेके निषिंचतिपितरः शुंधध्वमितिमंत्रेण ततो
यज्ञोपवीतीभूत्वाउदकोपस्पर्शनं ततश्चंदनादिनात्मानमनुलिप्यजपेत्सुवर्चाअहमितिमंत्रस्यप्रजाय ४८

© Dharmartha Trust J&K. Digitized by eGangotri

तिऋषिः यजुः आशीर्देवता जपे विनियोगः सुचक्षा अहमक्षिभ्यां भूयासं सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां
भूयासमिति मंत्रे अहतवाससः परिधाने अजरकर्षेत स्यच परिधास्या इति मंत्रस्य आलेवायन ऋषिः
पंक्तिश्छंदः वासोदेवता वस्त्रपरिधाने विनियोगः परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि
शतं च जीवामि शरदः पुरूची रायस्पोषमभिसंव्ययिष्ये इत्यनेन मंत्रेण यज्ञोवीतवद्य धारणं पूर्ववत् उ
त्तरीये परिधाने यशसा मेति मंत्रस्य आथर्वण ऋषिः पंक्तिश्छंदः लिंगोक्तादेवता उत्तरीयवस्त्रधारणे विनि
योगः यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती यशो भगश्च माविदद्यशो मा प्रतिपद्यतामित्यनेन मं
त्रेण आच्छादयीत यद्येकं वासो भवति तदा तस्यैव परिधानीयवाससः उत्तरार्धमुत्तरीयं कुर्यात् यशसमा
द्यावापृथिवी - - - - - - - - - - यामाहरज्जमदग्निरिति मंत्रस्य भारद्वाज ऋषिः अनुष्टुप् छंदः सुमनसो दे
वता - - - - - - - - - - ग्रहणं ततः शिरसि वेष्टयामाहरज्जमदग्निः श्रद्धायै कामायेंद्रियाय तामहं त

© Dharmartha Trust J&K. Digitized by eGangotri

तिष्टहूणामिग्रषा ... ब्रह्मणं ततः शिखिवंधने ... यद्यशास्य रक्षामिंदस्य

ॐ. कारवि ... शिरोवेष्टयते युवासुवा इति ...

४५ ... वासः परिवीतश्चा ...

... तेनमंत्रेण दक्षिणकर्णकुंडल ...

49 ... अलंकरणेदेवताअलंकरणधारणेविनियोगः ...

... वानकर्म्मेअनेनैवमंत्रेणहृतस्येतिमंत्रस्य प्रजापतिऋ

षिः गगायत्रीछंदं अंजनेदेवतावक्षकुजनेविनियोगः हृत्रस्यादेहीत्यनेनमंत्रेणादक्षिणः अङ्गे प्रथमेदक्षिणे ...

... मंत्रस्य सूर्यऋषिः यजुः आदर्शोदेवता आदर्शावेक्षणेविनियोगः ...

... मंत्रस्य गोतमऋषिः निहृद्गायत्री ... छत्रदेवताछत्र ४५

© Dharmartha Trust J&K. Digitized by eGangotri

हणेविणेनियोगः बृहस्पतेऋषिः ·········· प्रासोमातंर्धेहीत्यनेनमंत्रेणप्रतिष्टे ··········
·········· वेविनियोगः प्रतिष्टेस्थाविश्वतोमीपातमित्यनेनमंत्रेणोषानहौ
यतिस्तु ·········· याज्ञवल्क्यऋषिः त्रिष्टुप्छंदाएडोदेवतादंडग्रहणेविनियोगः
विश्वाभ्योमानोष्टाभ्यस्य ·········· नेमंत्रेणवैणवंदंडमादत्ते अभिषेकादिदंडदानांतेस्नानकर्ता
करोतिनाचार्यः दंतप्रक्षालनाः ·········· मंत्रवेतिभवंति वासःछत्रोपलहो ·· मवानामुपादानेमं
त्रोभवति ततश्चाचार्यः स्नातकस्यनियमो ·········· वयेत् तद्यथा नृत्यगीतादिवादित्राणिस्वयंनकुर्यात् अन्यैः
गीतादिक्रियमाणेनगछेद्द्रष्टुंश्रोतुंवा इछयाऽपरैः क्रीयमाण ·· तेप्रतिगछतास्वयंचकुर्यात् देमेसतिरात्रौ
ग्रामांतरेनगछेत् अकेमेत्तकामेगछेत् नवदंतेमेसतिधावेत् उदयोनावेक्षणंदृक्षारोहण ·········· लङ्घवयन
संप्रिसर्पणविहृतेस्नानविषमलंघनशुष्कवदनसंध्यादित्यप्रेक्षणभेक्षणानिनकुर्यात् वर्षन्यद्राष्टतोव्रजेद

© Dharmartha Trust J&K. Digitized by eGangotri

येमेवत्रः याय्मानमपहनदित्यनेनमंत्रेण अस्या न्मानेनावेक्षेतोग्रनातस्नोभ्र वण्रुरुषाः षंद ···· नोपहसेत् नव
ॐ. गच्छेदेतानिप्रति गर्भिण्यीविनमेतिब्रूयात् सकलमितिनकुले भगालमितिकपालेवदेत् मणिधनुरितीर्ईषत्रु :
५० गोधयंतीयरस्मैनादत्तीता उर्वरायामनेनहिंतायोक्ष्मान् अपस्निष्टन्नमूत्रपुरीषेकुर्यात् ····· अशे ··· निका
50 हेवगुदंप्रमजीतविहतेवासोनाछादयीन दहव्रतोवेधन् स्नात्सर्वेषामिवामिव स्नातस्यसतेत्रादोरा ··· ·····
···· ··· ते तद्यथा ······ साशीभवति अम्हन्मयेनपात्रेणपिवतिस्त्रीस्द्रद्शवका ··· ··· ·········
······ स्यादिभिः सहनकुर्यात् शवा ···· सतकात्रानिवनाद्यात् शोवैसतिक्रीताल ··· ·· ··· ·· ···
······· नकुर्यात् शावस्त्र ········ ·· कात्रानिवनाद्य ज्याशातेसतिक्रीतालब्वा ··· ·· ··· ··· ····
कुर्यात् ··· ····· ····· ··· दिनाः तसेनो ··· का ··· न् वावज्योत्पदिया ···· ···· ··· ···
वेनावस्ननाश्रमासास्सादयोयमनियमाः कर्त्तव्याः यदिप्रवर्ग्येवा ······ भवतितदामूत्रपुरीषेष्ठीवनेवा ५०

© Dharmartha Trust J&K. Digitized by eGangotri

तयेनकुर्यात् इत्येवमादीनैकुर्यात् तिसदाशिवदीक्षितकृतकाशीदीक्षितकृते प्रयोगरत्ने समावर्तनप्रयो
गः अथक्रमप्राप्तोविवाहः तत्रतावतडुपयोगितयाकिंचित्संदेयेणात् अते अनाश्रमीनतिष्ठेतदिनमेकमपिद्विजः
आश्रमेणविनातिष्ठप्रायश्चित्तीयतेहि इत्यादिदक्षस्मृतेर्गुरवेनेत्ववरविस्नायीततदनुत्तया वेदंव्रतानिवायारंनी
त्वागुभमश्वपमेववा अविस्लुतब्रह्मचर्योदिदक्षणोहिंतयमद्वहेत अनन्यपूर्विकांकांतामसपिंडांयवीर्यसी अरो
गिणीभ्रातृमतीमसमाकार्षकीत्रजामितियाज्ञवल्क्योके स्त्रिविशेपिवेदव्रतोभरव्रातकाः विलंवेनलक्षणा
दिविशिष्टांस्त्रियंपुत्रेनष्टकन्याहतयेत्वीतिनपरीदित्यमद्वहेत तत्रापिकुलमग्रेपरीक्षितेनेतिगृह्यवचनाद्दश
सदोवारांदिगुणादत्तयाहीनक्रियतादिदोषहनितयावपरीक्षकुलेतज्ञोद्वाह्या तदनुलक्षणायपिपरीक्ष्ये
लक्षणानिवशुभाशुभसूचकानि ननुलोमकेशादशवतादीनिप्रत्यक्षगम्पानिवाह्यानि श्रोत्रराणिवाष्टौपि
डानकृतेत्यादिनाशृह्योक्तानिद्विविधमन्यपिमहाग्रंथेभ्योज्ञेयानिविस्तरभियात्रिरूक्तोच्यंते यदानेतोपभोगे

© Dharmartha Trust J&K. Digitized by eGangotri

नवापुरुषांतरस्यविकानभवंतिस्तानन्यस्यविकानो अनेनवादत्तमसनोदत्ताग्निपरिगतास्समदनीताभ्युक्ताग्रहीतगर्भाप्र
ॐ· सूताचेतिसप्तपुनर्भवोश्चादर्शितौकानीनौवैकुमेनोनयनयोराह्वाणदवत्त् समानएकः पिंडः पिंडदानक्रियामूलपुरुष
५१ शरीरेवापस्मात् विद्यतेसा ऽसपिंडाता कथंविदेकपिंडक्रियानुप्रदेशेन निर्वाप्यसापिंडश्चकेविदाहुः एकश
रीरावयवान्वयेनावयवसापिंडं विज्ञानेश्वरादयोनिदेशिमेनिरे अत्रवदुतरेवकर्म विनारत्नताप्रयोगरत्नेता भग
51 मीसानोच्यते नत्वेवंविषमतृशरीरावयवावायेन् सापिंडानिप्रसंगेनकाप्यसपिंडेत्यतआह याज्ञवल्क्यः पंच
मात्सप्तमादूर्ध्वमातृतः पितृतस्तथेति मातृपक्षेपंचमापितृपक्षेसप्तमादूर्ध्वसापिंड्यंनिवर्तनइतिशेषः कूट
स्यमारभ्यात्रगणना तडक्तं वध्यावरस्यवातातः कूटस्याघदिसप्तमः पंचमीवेतयोम .... नि
र्तनइतिकूटस्योमूलपुरुषःयतासंतानभेदः एवंवमातृपितृद्वारकसापिंड्यवतीनांकन्यकानामिपंसेक
लनालहोढः पितरौतत्रूत्पत्रकदेपतिर्हेतस्यवनुक्रमहएकमतोप्यस्यक्रमाक्षोडषा वेशारेभकदेपति ५१

© Dharmartha Trust J&K. Digitized by eGangotri

प्रमितिरित्यासप्तमकद्वयंरदाष्टकैकान्वयेकन्यकाः पितृकुलेतासप्तमकद्वयंभुवे १ यद्यप्येकस्यैवञ्चोपिसुतासुत्लदयी
हृत संबंधसाम्यादे कैकगणितेप्यवध्यर्यन्तां २ एकस्मान्निपुत्रान्सुतोथडहिताद्वंद्वयेतनद्वयान्नस्माद्वंद्व
यत्रुष्कराष्टवततोतःषोडशान्तोरदाः मावत्सप्तमकद्यमग्निरूतवःकम्माद्हेलातयेतादेतैर्गुणितारासिक
त्वदशैवेशासपिंडाः पितुः २ मातुर्जन्मदशेपतीवमिथुनकूं इंतगेः सागरास्तस्यापेवमकश्पदसमश्च
मितिरित्मिकान्वयः पुंसुतोद्वंद्वाद्वंद्वयुगान्नतोष्वयइनोष्टापेववद्वंशरदोगणः सप्तगुणाः शराश्रविषकेमा
तुः सपिंडाःकुलो ४ कुलद्वयस्सकन्यकाप्रुतामियःसपिंडकाः हिमांशुद्रुगक्षाष्टशेग २१२१ विवाहकर्मव
र्जिताइति ५ यवीयसीस्वापेदयावसमावपुषावन्नूनां आरोगिणीश्चविकित्सराजयक्ष्मादिरोगरहितां भ्रातृम
तीमितिपुत्रिकाकरणशेकानिहत्यर्थोमत्र उपुत्रिकाकरणभावनिश्चयस्ताभः भ्रातकामप्युद्दिहेत् असमानार्षगो
त्रजोऋषेरिदमार्षगोत्रप्रवर्त्तकस्यमुनेर्वावर्त्तकः प्रवरइत्यर्थः गोत्रंवंशपरंपराप्रसिद्धं समानेआर्षगोत्रेय

© Dharmartha Trust J&K. Digitized by eGangotri

स्यतजपानभवतितो याम्कवाष्कलमौनमौकानोभिन्नगोत्राणामपि भार्गववैतहव्यसावेतसेभिप्रवरैक्यमस्तितत्र
ॐ विवाहो माभूदित्यसमानार्षजामित्युक्तं अंगिरसावरीषयौवनाश्वेति अंगिरसमांधातप्रवरभेदेपियौवनाश्व
५२ गोत्रैक्यं तादृशे विवाहनिवारणाय समानगोत्रजामित्युक्तं तथा च गोत्रप्रवरौ पृथक्कार्यदासेनिमित्तभूतौ अवै
कैविशेषमाह बौधायनः ये चानो त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः भृग्वंगिरोगणेष्वेवं शेषेकोपित्राणयेदि
ति गोत्रप्रवरनिर्णयः सपिंडसगोत्रसप्रवरविवाहप्रायश्चित्तादि च महाग्रंथतोवसेयं विस्तरभियेह नोच्यते
सपत्नमातामहकुलेप्यतिदेशिकान्यापिंड्यादविवाहः तथा च मनुः पितृपत्न्यः सर्वा मातरस्तद्भ्रातरो मा
तुलास्तद्भगिन्यो मातृष्वसारस्तद्दुहितरश्च भगिन्यस्तदपत्यान्यथा संकरकारिणः स्युरिति अत्र यावद्वचनं वा
चनिकमिति न्यायेन परिगणितेष्वेवातिदेशिकं सापिंड्यं न तु पंचमसप्तमपर्यंते क्वचित्तु वचनादेव विवाहनि
षेधः यथाश्वलायनगृह्यपरिशिष्टे अथ विवाहस्तूपक्रम्य मध्ये विरुद्धसंबंधमपृथक्कृत्वेतेनत्कानेदपमो ५२

52

© Dharmartha Trust J&K. Digitized by eGangotri

र्मिथः पितृमातृसाम्ये विरुद्धसंबंधेयथाभार्यास्वसुर्दुहितापितृव्यपत्नीस्वसावेतिस्वयमेवविरुद्धसंबंधेविहितोनतथाना
रदः प्रत्युद्वाहोनैवकार्योनैकस्मैदुहितृद्वयं नैवैकजन्ययोःपुंसोरेकजन्येवकन्यके नैवंकदाचिदुद्वाहोनैकदामुंड
नद्वयं अन्यत्रापि एकजन्येतुकन्येद्वेपुत्रयोर्नैकजन्मनोः नपुत्रीद्वयमेकस्मैप्रदद्यान्नकदाचनेतिः अथवरगु
णाः तत्रबुद्धिमतेकन्यांप्रयच्छेदितिआश्वलायनगृह्ये। कुलं। यमः। वपुःशीलंवयस्तरूपंविद्यांवविक्रो‥‥
मितांच एतान्गुणान्समवेक्ष्यदेयाकन्याबुधैः शेषमचिंतनीयं अन्यापिगुणदोषविचारोग्रंथमादादवसे
मः अन्यच्च‥‥ ‥ ‥ ‥ ‥ ‥ ‥‥ ‥‥ पुत्रीविवाहोषिरुन्नत्रयो अदोन ‥‥ ‥‥ ‥‥‥
‥‥ तुनदोषइतिसंहितासारा‥‥‥ ‥ फाल्गुनेचैत्रमासेतुपुत्रोद्वाहोपनःयने नेदादह्यल्यकुर्वीत
नमन्त्रयविलंबनमिति इत्यादि देयकन्याकालोमहाग्रंथतोज्ञेयः वधूवरयोर्गृहस्पत्यादिशुद्धिर्विवाहो
कालशुद्धिर्वर्णेनव्यापाहियनन्निभुसाधकबाधकव्यवस्थावर्ज्योजनमहूकरिष्येइतिसंकल्प्यगणेशादिभिर्द

अत्र पत्रमेकं त्रुटितम्

© Dharmartha Trust J&K. Digitized by eGangotri

द्विर्गणेशगणपतिं पूजयित्वा यथाचारं कलशपूजनादि कृत्वा स्वस्थाने कन्यां पूजयित्वा रेउपवेशयेत् स्वयं तत्राग्नेः प्रत्यङ्मु
ॐ खउविश्य प जे गंधतांबूलदानादिना पूजयेत् सर्वदात्मदं ततो दाता आचारतो हरिद्राखंडं पंचवट फपूगफलानि वरं
५२ याद्त्तालंकृतानि गृहीत्वामुकप्रवरान्वितामुकगोत्रोत्पन्नायामुकप्रपौत्रायामुकपौत्रायामुकपौत्रामुयाक
शुन्मया मुकनाम्नोवरायामुकप्रवरान्वित मुकगोत्रोत्पन्ने .... ममुकयोत्रीममुकस्य ममपु
53 त्रीममुकनाम्नी .... प्रददे शं इति वाक्यान्ते गोपतिते ऽक्लीवेदत्तदोष
विवर्जितोऽमाकन्यां प्रदास्यामि देवाग्निद्विजसन्निध्यमिति वरपित्रादिवस्त्रप्रांतेनाविपूगफलानि प्रदि
ष्यप्रतिष्ठामंत्रेणमनोज्योतिरित्यादिना वस्त्रे वस्त्राग्रंथिं वंदनेव वंधेदित्याचारप्राप्तं ततो हरिद्राखंडपंचपू
गफलानि तथैव वरपित्रादिर्गृहीत्वामुकगोत्रामुककवरविषये मंवंतो निश्चितं भवंत्विति दातृवस्त्रग्रं
तप्रदेयादिकुर्यात् ततो दाता वाचा दत्तामयाकन्यापुत्रार्थं स्वीकृता तयाः कन्यावलोकनविधिमेनिश्चित ५२

© Dharmartha Trust J&K. Digitized by eGangotri

त्वं सुखी भवेति दातारं प्रतिपठेत् सर्वः वा वादनात्तया कन्या पुत्रार्थं स्वीकृता मया वरावलोकनविधौ निश्चितस्त्वं

मे सुखी भवेति दातारं प्रतिपठेत् आज्ञादौ स्वीकृतौ रेत्रार्थं मित्रार्थं मित्सूहः कार्यः ततो ब्राह्मणाः शिवाः आपः

सन्तु सौमनस्यमस्तु अक्षतं चारिष्टं चास्तु दीर्घमायुः शान्तिः पुष्टिश्चास्तु यत्पापं तत्प्रतिहतमस्त्वित्युक्त्वा ततो दाता

पात्रस्य सिततन्डुलपुंजे शचीमावाह्य षोडशोपचारैः पूजयेत् तां च कन्यैवं प्रार्थयेत् देवेन्द्राणि नमस्तुभ्यं

देवेन्द्रप्रियभामिनि विवाहं भाग्यमारोग्यं पुत्रलाभं च देहि मे इति ततः पुरंध्रीभिर्नीराजनादिमांगलिकं

कार्यं विप्राश्च गंधताम्बूलादिपूजिता आशीर्मंत्रोन्पठेयुः तेच श्रीश्चते लक्ष्मी पाणि दक्षिणतस्तु हेकउपद

श्यति तदेताः पुण्यालक्ष्मीर्दक्षिणतोदश इति तस्याश्च दक्षिणतो लक्ष्म भवति तं पुण्यलक्ष्मीक इत्याचक्ष

तउत्तरतस्त्रियाउत्तरतश्चापतनाहिंस्त्रीतत्राकृतमेदपुरस्तात्तं नाउपदश्यपत्राहे वाशीरस्तदेवहन्तुतज्जि

कार्ष्येताः पुण्यालक्ष्मीक इत्याचक्षते १ कुलायिनी मिहता कुलायिनीघृतवतीपुरंविरितिकुलायमिव

वद्वितीयाविति: स्योने सीदसदने पृथिव्या इति पृथिवी वै प्रथमा वितिस्तस्यै शिवे स्योने सीदसदन इत्येतदभिता
ॐ· रुद्रा वसवो गृणंतित्येता एवादेवता अभिगृणंतित्येतदिमा ब्रह्मपीपिहि सौभगायेतीमा ब्रह्माव सौभगायेत्येत्ये
५८ तदक्षिनाश्वर्यु:सादयतामिह त्वेत्याश्वनौ ह्यश्वर्युर्ध्द उपाधत्तां २ एवमादय: सौभाग्यप्रदाना: पठनीया मनोज्ञ
54 तिरित्यादयश्च इतिप्रयोगरत्ने वाग्दाने विधि: ततो वैवाहिके शुभमुहूर्ते वधूवरयोर्लौल्हविद्धारोपणादियः
था वारं कार्यो वाग्दानोत्तरं देशान्तरं गते वदे तादृश: प्रतिकृष्णत्रय: कन्यां वरो देशान्तरं व्रजेत् त्रीणृतूंस्तु सम·
तिक्रम्य कन्यान्यं वरयेद्वरं वरमरणोत्तु वसिष्ठ: अद्भिर्वाचा च दत्तायां म्रियेतादौ वरो यदि न च मंत्रोपनीता स्या
तो कुमारी पितुरेव सा यस्मै वाग्दत्ता तस्य दोषयोगे प्रशस्तवरान्तरलाभे वा तस्मै लब्धे वैसाह याज्ञवल्क्य: दत्ता·
मपि हरेत्पूर्वाच्छ्रेयांश्चेद्वर आव्रजेदिति अत्र पूर्वस्य वदोषयोगे इति विज्ञानेश्वर: प्रतिश्रुत्याप्यधर्मेण संयुक्ता
य न दद्यादिति वसिष्ठ: अन्यथा हरणे तु सपवदंडमाह सहृत्य दीयते कन्याहरतां चौरदंडे भागिति विवा ५८

© Dharmartha Trust J&K. Digitized by eGangotri

हेमंडपप्रकारमाह वसिष्ठः षोडशारत्निकं कुर्याच्चतुर्द्वारोपशोभितं मंडपं तोरणैर्युक्तं तत्र वेदिं प्रकल्पयेत् अष्ट
हस्तंतरचयेन्मंडपंवाह्यिषट्करे द्विषट्करेद्वादशकरे वेदिकाप्रकारमाह नारदः बहस्तोच्छ्रितां चतुर्हस्तैश्चतुरस्रा
समंततः स्तंभैश्चतुर्भिः सल्लक्षणां वामभागे तु सद्मनि समां तथा चतुर्दिक्षु सोपानैरतिशोभितां प्रागुदक्प्रव
णां रंभास्तंभवहंसपुत्रकादिभिः विचित्रामंकितां कुंभैर्विहितैस्तोरणांकुंभैः २ भृंगारपुष्पनिकरैर्वस्मैकैः स
मलंकृतां विप्राशीर्वचनैः पुण्यस्त्रीभिर्दीपैर्मनोरमां वादित्रगीतनृत्याद्यैर्हृदयानंदिनीं शुभां एवंविधाना
हस्तोन्मिष्टुने साग्निवेदिकामिति हस्तोच्चवर्धा सोपानकरणं पश्चिमभागे उपरिचतुर्दीक्षु वाग्रथ्यंयथावारे सो
पानातिरेकेण चतुर्हस्ता चतुरस्रा इति विवाहवेदी अथ विवाहपूर्वदिनात्पूर्वकर्तव्यं वधूपितावरपिता च वि
वाहदिनात्पूर्वेद्युः पूर्वाह्णे सपत्नीकः कृताभ्यंगो धृतमांगलिकवेशः कृतलेपनरंगमालिके प्रांगणे शुभा
सने प्राङ्मुख उपविश्य पत्न्या दक्षिणतः कन्यां वरं वोपविश्याचम्य प्राणानायम्येष्टदेवतागुर्वादिनमस्कारं कृ

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ. त्वादेशकालौ संकीर्त्य अस्यामुकशर्मणः पुत्रस्य अमुकः करिष्यमाणविवाहाङ्गभूतं स्वस्तिवाचनपूर्वकं अविघ्नपूजनं
मंडपप्रतिष्ठामातृगणपूजनं वसोर्धारां नांदीश्राद्धं करिष्ये इति संकल्प्य उक्तरीत्या स्वस्तिवाचनादीनि कुर्यात् कन्या
५५ पिता अस्या अमुकनाम्न्याः कन्यायाः इत्यादि विशेषेण संकल्प्य सर्वं कुर्यात् मंडपदेवताप्रतिष्ठाविधिं कुर्यात् दू
र्वाशमीपल्लवकुशदेवहरित्पल्लवानाम्रादिप्रशस्तपत्रवेष्टितान् सूत्रेण षोडश वेष्टयेत् ततैकत्रमुशलमेकत्रक्त
रिकाशैव मध्ये प्रदीप्य वेष्टयेत् तानि षड्दं शयात्रे निधाय येतन्मध्ये उवहू संस्कृं पुवत्तर्ष्टक्रमेण नंदिनी नलिनी मैत्रो
मासुतडत्तरस्वेमुशलगर्भेय पुवर्धनीतडत्तरस्वोशस्त्रगर्भे भगवतीडंडुलचूर्णेहरिद्राखंडपूगफलघृमुज्वशरावे
णसहसूत्रवेष्टिते स्वत्मकलशे अविघ्नसंत्रेगणपतिं तावाद्य मनोजूतिरिति प्रतिष्ठाप्य नीराज्य आसनादि आवेम
नीयांतोपचारैः पूजयित्वा ते लोहर्त्तनीस्मोदकैरभ्यंगस्नानेषेएणं वेष्टितानां कारयित्वा गंधादि दद्दिणं तोपचारैः पू
जयेत् पुष्पांजलिं दत्वा नीराज्यो अयसपत्नीक आग्नेयकोणस्थ मंडपस्तंभोपरि नंदिनीनामकं वेष्टितं मनोजूतिरि ५५

© Dharmartha Trust J&K. Digitized by eGangotri

तिस्थापयित्वास्थिरोभवेत्तत्रनंदिनींपूजयेत् तत्रैवंक्षेत्रे नितामेनिकामइतिमंत्रेणप्रोद्यगंधद्वारामितिगंधंनंदिन्यैनमः
इदमनुलेपनं अक्षतेनमीमदंतहीत्यक्षतान् दधिक्रा···· इतिदधिः कांडात्कांडादितिदूर्वांपुष्पाणिसमर्पयेत्
नंदिन्यैनमः इमानिपुष्पाणि नंदिन्यैनम अयंधूपः नंदिन्यैनमः अयंदीपः ······ दिनौनमइदंताम्बूले
स्तंभमालभ्यउर्धऊर्ध्वएणइतिजपः एवंसर्वस्तंभेषुज्ञेयः ततोनैर्ऋत्य·············· उपरिभागेक्रमेणनलि
नींमैत्रींमायपशुवर्धनीनामवेष्टितानिउक्तवत्स्थापयित्वापूजयेत् नलिन्यैनमः मैत्र्यैनमः उमायैनमः पशु
वर्धन्यैनमः ततोवंशपात्रेणसहभगवतीगौर्यादिमातृकास्थापनेवंशपात्रेवस्त्रपंगृहीत्वाअविघ्नकलशंवपत्न्याग्रा
हयित्वासब्राह्मणः आनोभद्राःस्वस्तिनइंद्रइतिसुमंगलसूक्तानिपठन्मंगलवाद्यघोषेणगृहद्वारसमीपंगत्वात
त्रद्वारमातृकापूजयेत् जयंतीविजयानामसहशोभवात्तपिंगलाभद्रकालीप्रपूजयेत् ततोमनोजूतिरितिप्रति
ष्ठाप्य द्वारमातृभ्यः इदमनुलेपनं द्वारमातृभ्यः इमानिपुष्पाणिद्वारमातृभ्यः कायेधूपः द्वारमातृभ्यःअयंदी

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ. ५८

56

पः द्वारमातृभ्यः इदमनुलेपनैवेद्यं इतिद्वारमातृकापूजयित्वा ततोगृहोत्तरगत्वाप्रमाणालंकृतेशानदिशेतंडुलादि
पुंजवत्तद्वयोपरिवस्त्रार्थपिस्थापयित्वामनोजूतिरितिपठित्वापूर्ववद्गौर्यादिमातृपूजांकुर्यात् ततोवसोर्धारांक
र्णस्पृशंतिसूक्तंपठेच्चकुर्यात् ततःजलमातृकापूजनं तास्तु मत्सीकूर्मीचवाराहीकुर्कुटीडुंडुरीतथा जलू
कीसोमपाश्चैवसप्तैताजलमातरः ॐभूर्भुवःस्वःजलमातृः आवाहयामिनमः मनोजूतिरितिमंत्रेणप्रतिष्ठा
प्यजलमातृभ्यइदमनुलेपनंजलमातृभ्यइमानिपुष्पाणि जलमातृभ्यअयंधूपः जलमातृभ्यअयंदीपः ज
लमातृभ्यइदंनैवेद्यं ततोनांदीश्राद्धं तच्चसपिंडकंअपिंडकंवाकुर्यात् अन्यदपियथाकुलधर्मंवाकुर्यात् एव
मेवमंडपोमंडपदेवकप्रतिष्ठाचवधूलोपनयनेचक्षेपः ततःकर्मांगदेवताप्रीत्यर्थंद्विजसुवासिन्यादिभ्योभोजनं
कार्यं अग्नौतुसर्वमेतद्विवाहदिनेएवपूर्वंकुर्यात् अथवायथाकुलाचारंवा इतिकाशीदीक्षितकृतेप्रयोग
रत्नेमंडपवेदिकादिप्रतिष्ठा अथवरस्यवधूगृहगमनंवरः कृतनित्यक्रियोविधिवत्स्नातस्वाचान्तोब्राह्मणैः ५८

© Dharmartha Trust J&K. Digitized by eGangotri

सहसात्विकाहारंकृत्वाश्रमभुक्त्वावाईयद्वै नेननेष्ठेनेसहशंपरेणाष्टतेवस्त्रयुगलंकृतः स्ववीष्टदेवतांपित्रादींश्च
नमस्कृत्यैतैरनुमोदितोयथाविभवमश्वादियानमारूह्य ध्वनेध्वनत्सितच्छत्रः स्वर्चितैर्ज्ञातिबांधवैः स्वस्तिनइंद्रइति
सुमंगलसूक्तंपठनपरैर्ब्राह्मणैः पुरंध्रीभिः स्वर्णकलशादर्पणकन्यापुष्पाक्षतदीपमालाध्वजलाजैर्मंगलतूर्यैश्च
सहवधूगृहंगत्वातत्द्वावदेशेप्राङ्मुखः स्थितोनीराजनपूर्णकुंभयुतैः पुरंध्रीजनैः प्रत्युद्गतोनीराजितोंतर्गृहे प्र-
विश्यतद्गणमंडपाग्रः सोत्तरच्छदेहरितदर्भास्तीर्णे चतुरस्त्रे भद्रपीठे प्राङ्मुखः उपविशेत् मधुपर्कः त
त्रायंक्रमः प्राणानायम्यदेशकालौस्मृत्वाकन्यार्थिनेगृहागतायास्मैस्नातकायवरायकन्यादानांगभूतंमधुपर्कं
करिष्ये इतिकन्यार्थिनमित्यादिद्वितीयांतमुल्लाप्यमधुपर्केणार्हयिष्येइतिवासंकल्पयेत् अथवरस्यवैकल्पिका
वश्यकरणं यन्मधुनइतिमंत्रेणमधुपर्कप्राशने भक्षितशेषस्नडावशंवरेनिनयनेनततः कन्यापितावरमास
नमर्घ्यमीपोपकल्पयेत् ऊशाविष्टरौ द्वौ उस्रोदकं अर्घपात्रमाचमनार्थमुदकं दधिमधुघृतंकांस्येनापि

© Dharmartha Trust J&K. Digitized by eGangotri

हितमधुपर्कं वस्त्रोयुगलं वेदनपुष्पाणि अलंकरणं एतान्युपकल्प्य अथार्घ्यपित्रासनाहरणं साधुभवा
ॐ ५८ तास्तामर्चयिष्यामो भवन्तमित्यर्घ्यपिता अर्घ्यं प्रतिवदति अर्चयेत्यर्घीस्य प्रतिवचनं अर्घ्यपितुर्व्यतिरिक्तोन्य अर्घ्यं
संवोधयति विष्टरो विष्टरः ततोर्घ्यपिता प्रतिगृह्यतामिति वसकृत् ततोर्घ्योर्घ्यपितुः सकाशाद्विष्टरं प्रतिगृह्य
५७ तितस्मिन्विष्टरे मासनेनिषद्योपविशति वर्ष्मोस्मीति मंत्रस्याथर्वण ऋषिः अनुष्टुप्छंदः विष्टरो देवता विष्ट
रोपवेशने विनियोगः वर्ष्मोस्मि समानानामुद्यतामिव सूर्यः इमं तमभितिष्ठामि यो मा कश्चाभिदासतीत्यनेन
मंत्रेण ततः पाद्यस्य संवोधोदकस्यादानमर्घ्यपितुः ततोन्योर्घ्यं संवोधयति पाद्यं पाद्यं पाद्यं ततोर्घ्यपिता प्रति
गृह्यतामिति सकृद्वदेत् ततोर्घ्योर्घ्यपितुः सकाशात्पाद्यं प्रतिगृह्य मौनिषद्य तदुदकमंजलिनादाय विरा
जोदोहोसीति मंत्रस्य प्रजापतिऋषिः यजुः आपो देवता पादप्रक्षालने विनियोगः विराजो दोहोसि विराजो दो
हमशीय मयि पाद्या येविराजो दोह इत्यनेन मंत्रेण ततो वामपादप्रक्षालनमनेनैव मंत्रेण राजन्यवैश्ययोः ५८

© Dharmartha Trust J&K. Digitized by eGangotri

स्नकःप्रथमंवामपादप्रक्षालनं ततःपूर्ववद्द्वितीयोविष्टरः इयांस्तुविशेषःविष्टरोऽभूमौकृत्वातस्योपरिपादौकरोतिवा
र्ष्मोऽस्मीत्यनेनमंत्रेण अर्घ्यैपितुरर्घ्यादीने अन्यःप्राहार्योऽर्घोऽर्घः प्रतिगृह्यतां ततोऽर्घ्यंप्रतिगृह्णाति आपस्थइतिमे
त्रस्यप्रजापतिरृषिः यजुः आपोदेवता अर्घ्यग्रहणेविनियोगः आपस्थायुष्माभिःसर्वाकामानवाप्नवानीत्यने
नमंत्रेण ततोऽर्घंशिरसाभिवंद्यप्रागुदग्वानिनयन्नभिमंत्रयेत् समुद्रंवइतिमंत्रस्याथर्वणऋषिः अनुष्टुप्छंदः
आपोदेवताअर्घाभिमंत्रणेविनियोगः समुद्रंवःप्रहिणोमिस्वांयोनिमभिगच्छत अरिष्टास्माकंवीरामापरासेचिम
त्पयइत्यनेनमंत्रेण अर्घ्यैपितुराचमनीयादाने अन्यआचमनीयमाचमनार्थं प्रतिगृह्यतामितियजमानेनोक्ते अर्घ
पितुःसकाशादाचमनीयपात्रमादायवामहस्तेनगृहीत्वाकिंचिदुदकंदक्षिणचुलुकेनगृहीत्वाआमागन्यशसे
तिमंत्रस्यपरमेष्ठीऋषिः बृहतीछंदः आपोदेवताआचमनेविनियोगः आमागन्यशसासंसृजवर्चसा तंमाकु
रुप्रियंप्रजानामधिपतिंपशूनामरिष्टिंतनूनामित्यनेनमंत्रेणसकृदाचम्यस्मार्ताचमनंकरोति ततोऽर्घपिता

© Dharmartha Trust J&K. Digitized by eGangotri

मधुपर्कमादत्ते अन्यआह मधुपर्कोमधुपर्कोमधुपर्कः प्रतिगृह्यतामितियजमानेनोक्ते ततोऽर्घपात्रहस्तेस्थितेम
धुपर्कमर्घ्येईक्षते मित्रस्यत्वेतिमंत्रस्यबृहस्पतिरृषिः यजुः मधुपर्कोदेवतामधुपर्कावेक्षणेविनियोगः मित्रस्य
त्वेत्यनेनमंत्रेण ततः प्रतिगृह्णातिदेवस्यत्वेतिमंत्रस्यप्रजापतिरृषिः गायत्रीछंदः सवितादेवतामधुपर्कग्र
हणेविनियोगः देवस्य त्वाभ्यामित्यनेनमंत्रेणप्रतिगृह्यसव्येपाणौकृत्वादक्षिणस्यानामिकयामधुपर्कंप्रद
क्षिणमालोडयतिनमः श्यावेतिमंत्रस्यप्रजापतिरृषिः यजुः सवितादेवतानिरूक्षणेविनियोगः नमःश्यावा
स्यायान्नशनेयत्तआविद्धंतत्तेनिष्कृंतामीत्यनेनमंत्रेणसकृत् ततः अनामिकांगुष्ठेनमधुपर्कैकदेशंप्रागुदग्वादि
पति पुनरनामिकांगुष्ठेननिरूक्षपति एवंत्रिःप्रयवर्नत्रिर्निरूक्षणंभवति ततोमधुपर्कैकदेशंप्राश्नातियन्मधुन
इतिमंत्रस्यकुत्सऋषिः जगतीछंदः मधुपर्कोदेवतामधुपर्कप्राशनेविनियोगः यन्मधुनोमधव्यंपरमंरूपमन्नाद्यं ते
नाहंमधुनोमधव्येनपरमेणरूपेणान्नाद्येनपरमोमधव्योऽन्नादोसानीत्यनेनमंत्रेण पुनरप्यनेनैवमंत्रेणवारद्वयं उच्छि ५८

© Dharmartha Trust J&K. Digitized by eGangotri

ष्टएवप्राश्नाति ततः प्राच्यांदिशिजनैःसंचारवर्जितेप्रदेशेद्वादिपेडविष्टे ततःस्मार्तविधिनाद्विराचम्यमातारुद्राणामिति
मंत्रस्यब्रह्माऋषिः त्रिष्टुप्छंदः गौर्देवतागवाभिमंत्रणेविनियोगः ॐमातारुद्राणांदुहितावसूनांस्वसादित्याना
ममृतस्यनाभिः प्रनुवोचंचिकितुषेजनायगामनागामदितिंवधिष्ट ममचामुकशर्मणोयजमानस्यपाप्मानं
हनोमीतिगवालंभपक्षेप्रतिब्रूयात् यद्यपिसूत्रकारेणगवालंभोनियमेनउक्तस्तथापिमधुपर्केपशोर्वधइतिस्मृत्यं
तरनिषेधबलात्त्याज्यएव अतःकलियुगेउत्सर्गएव उत्सर्गपक्षेप्रयोगः मातारुद्राणामित्युक्त्वाममचामुकशर्म
णोयजमानस्यचपाप्माहतः ॐउत्सृजनतृणान्यत्त्विति ॐकारमुपांशूक्त्वाउत्सृजतेत्यागुत्रैः अनेनैवविधि
नासंवत्सरादूर्ध्वंऋत्विक् राजा ···· स्नातकोवा उत्कृष्टजातिःसमानजातिर्वास्वगृहमागच्छतिसततंअर्चयेत् सो
मेनयक्ष्यमाणःसंवत्सराद्वार्गपिऋत्विजोमधुपर्केणार्चयेत् ततःकन्यापितावरायवाससीदद्यात् वरःवस्त्रे
परिधास्यइतिमंत्रस्यआलेवायनऋषिः पंक्तिश्छंदः वासोदेवतावस्त्रपरिधानेविनियोगः परिधास्येः संवत्सर

© Dharmartha Trust J&K. Digitized by eGangotri

त्रिमंत्रेणयज्ञोपवीतधारणंपूर्ववत् यशसामेतिमंत्रस्याग्रालेवायनऋषिः पङ्क्तिछंदः लिंगोक्तादेवता उत्तरीयधा
उं· रणेविनियोगः यशसा प्रतिपद्यतामित्यनेनमंत्रेणउत्तरीयं ततोऽद्भिराचमनं कन्यापित्रादत्तंवेदनेभालेग्रन्थिलि·
५९ प्तसुवर्चाहमितिमंत्रस्यप्रजापतिऋषिः यजुः आशीर्देवताजपेविनियोगः सुवर्चाअहमदीप्याठ सुवर्चाम
5949 विनस्तुक्षाकर्मणोभूयासमित्यनेमंत्रेजपति याआहरुक्मद्भिरितिमंत्रस्यभारद्वाजऋषिः अनुष्टुप्छंदः सुम
नसोदेवतापुष्पग्रहणेविनियोगः याआहरः भगेनवेत्यनेनमंत्रेणपुष्पग्रहणं यद्यशोऽप्सरसामितिमंत्रस्यभ
रद्वाजऋषिः अनुष्टुप्छंदः सुमनसोदेवतापुष्पवेधनेविनियोगः यद्यशः शोमयीत्यनेनमंत्रेणपुष्पवेधने
अलंकरणमितिमंत्रस्यभरद्वाजऋषिः उष्णिक्छंदः अलंकरणदेवताअलंकरणधारणेविनियोगः अलंकरः
भूयादित्यनेनमंत्रेणकर्मयोरलंकरणं इतिमधुपर्कः अथकन्यास्नाता परिहिताहतवस्त्रा गृहोतः सूत्रवे·
ष्टितोपलसहितदृषदुपरिहरिद्रानिर्मितोगौरीहरौसौभाग्यादिकामनयापूजयितार्द्राणेवततैवादत्तसुंतेष ५९

पूजयित्वा प्रार्थयेत् देवेन्द्राणि नमस्तुभ्यं देवेन्द्रप्रियभामिनि विवाहे भाग्यमारोग्यं पुत्रलाभं च देहि मे इति ततो गौरी
सौभाग्यादि प्रार्थयमाना तत्रैव तिष्ठेत् ततो वरः प्राणानायम्य देशकालौ स्मृत्वा धर्मप्रजासम्पत्यर्थं दाराप्रतिग्रहमहं करि
ष्ये तदङ्गतया विहितं अग्निप्रतिष्ठापनमहं करिष्ये मण्डपस्येशान्यादिशि पंचभूसंस्कारान् कृत्वा लौकिकाग्निर्निर्मथ्यो वा
स्थापयित्वा वरः वैकल्पिकावधारणं कुर्यात् लौकिकाग्निस्थापने गौरीपरिणयने कुमार्या वासः परिधानादि गृह
मध्ये अग्नेर्दक्षिणतः कुंभस्थापक तेजन्याद दक्षिणपादेन परिवर्तने पूर्वेण ब्रह्मणो गमने उत्तरेण पात्रासादने द्वेप
वित्रे ताम्रमयी आज्यस्थाली पालाश्यः समिधः आघारौ समिद्वन्तमे आज्यभागौ पूर्णपात्रे राष्ट्रभृद्धोमः ज
याहोमः अभ्यातानहोमः स्रुगन्तु पंथामित्याद्य संते परं मृत्यो इत्याहुतिः वधा आनडुह चर्मोपवेशनं प्राच्यां त्रि
रात्रं ब्रह्मचर्यमुभयोः एतान्वैकल्पिकान्पदार्थानहं करिष्ये ततः अग्नेः पश्चात् तृणपूलकं स्थापयेत् अथ कन्या
दानादि ब्राह्मणाः स्वलङ्कृते वेश्मनि मङ्गलगीततूर्यनिर्घोषे क्रियमाणे पूर्वं परभागपोहं स्नातरालं विहाय प्रत्ये

© Dharmartha Trust J&K. Digitized by eGangotri

कंप्रस्थमितसिततंडुलैर्द्वौराशीकृत्वामध्येकुंकुमोदिकृतस्वस्तिकांकितमंतः पठेरा प्रथमोमध्येउत्तरदशंध्मरपेषु
उं॰ ६० अथपूर्वराशौप्रत्यङ्मुखंवरंपश्चिमराशौवप्राङ्मुखींकन्यांतंडुलगुडजीरकपुतांजलीउभाववस्थाप्यद्विजाः स्वस्ति
नइंद्रोवृद्धश्रवाइतिसूक्तंपठेयुः पुरंध्र्योमंगलगीतीः कुर्युः वधूवरौचमनसेष्टदेवतांध्यायेतामितिष्ठेतां अथज्योति
षिकेनमंगलपद्यपाठपूर्वकंसुमुहूर्तोक्तेनदेवलग्नमितिपठितेप्रदिष्टेकालेसद्योंतःपटमपसार्यकन्याव
राभ्यांपरस्परंस्मिन्नंजलिस्थतंडुलगुडजीरकावकिरणंकारणीयंततः वरंप्राङ्मुखंवधूंवप्रत्यङ्मुखींकारा
यित्वा ततःकन्यापितावस्त्रद्वयंवरायप्रयच्छति तयोर्मध्येएकंवरःकुमारीपरिधापयति जरांगच्छेतिमंत्रस्य
प्रजापतिरृषिः त्रिष्टुप्छंदः वासोदेवतावस्त्रपरिधानेविनियोगः जरांगच्छपरिधत्स्ववासोभवाकृष्टीना
मभिशस्तिपावा शतंचजीवशरदःसुवर्चारयिंचपुत्राननुसंव्ययस्वायुष्मतीदंपरिधत्स्ववासइत्यनेनमंत्रे
ण याअकृंतन्नितिमंत्रस्यप्रजापतिरृषिः त्रिष्टुप्छंदःवासोदेवताउत्तरीयपरिधानेविनियोगः याअकृंतन ६०

60

© Dharmartha Trust J&K. Digitized by eGangotri

वयेयोक्तनवतयाश्चादेवीस्तत्तनमितोननतेथ तास्यादेवीजेरस्तेसेवयस्तायुष्मतीदं पविश्वस्त्वासअस्ननेनमंत्रेणेोत्तरीयेप
रिधनेवरस्यमंत्रपाठः अथकन्यायाः पितावरकुमायौसेमंजयतिपरस्परेसमंजेथामित्यनेनप्रैषेण समंजनेविनि
योगः समंजेतुविश्वेदेवाः समापोहृदयानिनौ समातरिश्वासंधातासमदेष्ट्रीदधातुनावित्यतेमंत्रंसंस्त्वीभूतोव
रः पठति ततोवधूवरौउपविशतः प्राङ्मुखोवरउविशेत् प्रत्यङ्मुखकन्या अथकन्यादाने तत्रायंक्रमः दातावधूव
रयोर्दक्षिणतः स्वदक्षिणहस्तदेशेस्वपत्नीसहितः उदङ्मुखउपविश्यवद्धशिखः पवित्रावस्थकुशपाणिः प्राणानायं
म्यदेशकालावुत्कीर्त्यममसमस्तपितॄणांनिरतिशयसानंदब्रह्मलोकावास्यादिकन्यादानकल्पोक्तफलावा
प्तयेअनेनवरेणास्यांकन्यायामुत्पादयिष्यमाणसंततयाद्वादशावरान्द्वादशपरान्पुरुषांश्चपवित्रीकर्तुमात्म
नश्चलक्ष्मीनारायणप्रीतयेब्राह्मविवाहविधिनाकन्यादानमहंकरिष्येइतिकुशाक्षतजलेनसंकल्प्या तत्र
दानवाक्यं अमुकगोत्रस्यअमुकप्रवरस्यअमुकशर्मणः पुत्री एवमेवपुनर्वरिहयममिहितं कन्यापिताकु

© Dharmartha Trust J&K. Digitized by eGangotri

प्राजलाद्दत्तयाणिउदङ्मुखोपविष्टःप्राङ्मुखोपविष्टायवरायप्रत्यङ्मुखोपविष्टांकन्यांयथाशक्त्यालंकृतोऽमुकगोत्राय
उं॰ अमुकामुकप्रवरायामुकवेदाध्यायिनेऽमुकशर्मणेब्राह्मणायइतिब्राह्मणवरपक्षे इतरवरपक्षेवर्मणेगुप्तायदा॰
६१ सायेतिविशेषः अमुकगोत्रांअमुकामुकप्रवरांअमुकनाम्नीमिमांकन्यांयथाशक्त्यालंकृतांप्रजापतिदैवतांपुत्र
61 णोत्पत्तिगुणीकृतज्योतिष्टोमातिरात्रफलप्राप्तिकामः कन्यादानफलप्राप्तिकामोवाभार्यात्वेनतुभ्यमहंसंप्रददे
इत्युक्त्वाकुशान्वितेजलेकन्याहस्तंवरस्यदक्षिणहस्तेदद्यात् वरस्तुस्वस्तीत्युक्त्वाकन्यायादक्षिणांसमभिमृश्य
द्यौस्त्वाददातुपृथिवीत्वाप्रतिगृह्णात्वित्यनेनमन्त्रेणप्रतिगृह्णाति यस्त्वयाधर्मश्चरितव्यःसोऽनयासहध॰
र्मेवार्थेवकामेवत्वयैषानातिचरितव्या नातिचरामीतिवरः अथकोदादितिकामस्तुतिंपठेत् कोदात्क॰कामैतत्तेअ
थकन्यापिताकृतैतत्कन्यादानस्यप्रतिष्ठासिद्ध्यर्थमिमांदक्षिणांतुभ्यमहंसंप्रददेइतिसजलंयथाशक्तिसुवर्ण
दानदक्षिणांतेनवरहस्तेदत्वानममेतिवदेत् ॐस्वस्तीतिवरः ततोदातातान्नभाजनगोमहिष्यश्वगजदासीदासभूश ६१

© Dharmartha Trust J&K. Digitized by eGangotri

ग्यावाहनालंकारादि यथाविभवं संकल्प्य सर्वं कदद्यात् तत्र मंत्राः यत्तसायनभूतायाविश्वस्याघप्रणाशिनीः विश्वरूप
धरीदेवः प्रीयतामनयागवा गोः सर्वस्याश्रयाभूमिर्वराहेण समुद्धृताः अनंतसस्यफलदाअतः शांतिं प्रयच्छमेभू
मेः इयं ससीमयातुभ्यं श्रीवत्सप्रतिपादिता सदाकर्मकरीभोग्यायथेष्टं भद्रमस्तुमे यस्माः अशून्यं शयनंनित्यमन
नोश्रियमनुत्रतिं सौभाग्यं देहिमेनित्यं शय्यादानेनकेशव शय्यायाः हिरण्यगर्भसंभूतं सौवर्णं चांगुलीयकं सर्वप्र
दं प्रयच्छामिप्रीणातुकमलापतिः अंगुलीयकस्य क्षीरोदामथनेपूर्वंमुद्धृतं कुंडलद्वये श्रियासहसमद्भूतं ददे
श्रीप्रीयतामिति कुंडलयोः इदंगृहेगृहाणत्वं सर्वोपस्करसंयुतं तवविप्रप्रसादेनममास्त्वभिमतंफलं गृहस्य
इंद्रादिलोकपालानां याराज्यमहिषीशुभा महिषास्तुरस्य जननीसास्तुमेसर्वकामदा महिष्याः यशापवादयैश्च
न्याद भद्रत्वस्य वाभवत्प्रणात् उत्पन्नेपायेदानेनतात्म्रपात्रस्यनश्यतु ताम्रपात्रस्य पानियायाम्यनेनिकामोस्यानि
कृतानि वाकांस्यपात्रप्रदानेनतानिनश्यंतुमेसदा कांस्यपात्रस्य इत्यादि अपरेतुहोमांतेरजतसुवर्णादिदानमि

ॐ ८२

62

छेति अत्र देशाचारतो व्यवस्था कर्तव्या ततो ऽङ्गुष्ठकेन द्विगुणसूत्रेण दंपती कटिकंठदेशे वेष्टनीमारभ्य पंचवारं
वा त्रिवारं वा प्रदक्षिणं वेष्टयेत् पुरोधश्चानेन मंत्रेण परित्वागीर्व जुष्टयः इत्यनेन मंत्रेण ततः कंठदेशस्य सूत्रमधोनि
ष्काश्य पंकुंकुमाक्तमूर्णायुक्तं च कृत्वा तेन हरिद्राखंडं बध्वा तद्वधू वामहस्तप्रकोष्ठे वरो वध्नीयात् पदावध्नमिति मंत्रेण क
टिदेशस्य सूत्रमपरिनिष्काश्य तदंशं कृत्वा वरदक्षिणहस्तप्रकोष्ठे वधूर्वध्नीय तेनैव मंत्रेण एवं पित्रा दत्तां कन्यां गृ
हीत्वा प्रतिग्रहस्थानान्निष्क्रामति यदैषीति मंत्रस्य आथर्वण ऋषिः अनुष्टुप् छंदः लिंगोक्ता देवता निष्क्रमणे वि
नियोगः यदैषि मनसा दूरे दिशोनुपवमानो वा हिरण्यपर्णो वैकर्णः स त्वा मन्मनसां करोतमुकीत्यनेन मंत्रेण
निष्क्रमणप्रभृत्येकः पुरुषः उदकुंभं स्कंधे कृत्वा दक्षिणतो ग्रेर्वागपतः स्थितो भवतु नरतो वा अभिषेकपर्यंतं
अथैनौ वधूवरौ अग्निसमीपं गतौ कन्यापिता प्रेषयति परस्परं समीक्षेथामिति प्रैषेण ततस्तौ वधूवरौ परस्परं
समीक्षणं कुरुतः वरस्तु समीक्षमाणो मंत्रं पठति अघोरचक्षुरिति मंत्रस्य प्रजापति ऋषिः आद्यस्य त्रिष्टुप् छंदः ८२

© Dharmartha Trust J&K. Digitized by eGangotri

द्वितीयस्यानुष्टुप्छंदः तृतीयस्यचतुर्थस्यत्रिष्टुप्छंदः कुमारीदेवता समीक्षणेविनियोगः अघोरचक्षुरपति........
सुवर्चा वीरसूर्देवकामास्योनाशंनोभवद्विपदेशंचतुष्पदेहोमः प्रथमोविविदेगंधर्वोविविदउत्तरः तृतीयोग्निष्टे
पतिस्तुरीयस्तेमनुष्यजाः सोमोददद्गंधवायगंधवेदिददग्नये रयिंचपुत्रांश्चादादग्निर्मह्यमथोइमां सा नः
पूषाशिवतमामेरयस्वानऊर्सूउषतीविहरायस्यामुशंतः प्रहरामशेपंयस्यामुकामावहवोनिविष्याइस्ये
तान् एकेआचार्या प्रदक्षिणमग्निमानीयकन्यावासः परिधानादिकुर्वंति वधूवरौअग्निंप्रदक्षिणीकृत्याग्नेः
पश्चात्पूर्वासादितेकटेतृणपूलकेवाउपविशतो तत्रदक्षिणपादेनाक्रम्योपविशतिवरः वरस्यदक्षिणतोवधूः
अथवरोदेवताभिध्यानंकरोतितदाथा विवाहकर्मण्यहंयक्ष्ये तत्रप्रजापतिं इंद्रं अग्निं सोमं अग्निं वायुं सूर्यं
अग्नीवरुणौ अग्निर्वरुणौ अग्निवरुणौसवितारंविष्णुंविश्वान्देवान्मरुतःसर्कोत्रवरुणं ऋतासाहं ऋतधामानं
अग्निं चंद्रंपर्वाओषधीरप्सरसोमुदः मठ द्वितेविश्वसामानंसूर्यंगंधर्वंनक्षत्राण्यप्सरसोमेकुरीःइषिरं विश्वव्यच

© Dharmartha Trust J&K. Digitized by eGangotri

सेवातेगंधर्वेमङ्गोसरसःप्रष्ठयः वित्तेवित्तिंआकूतमाकूतिंविज्ञातंविज्ञातिंमनःशाक्करीःदर्शपौर्णमासेबृहते
उं॰ रथंतरेप्रजापतिंजयानिंद्रेअग्निंभूतानामधिपतिंयमंपृथिव्याअधिपतिंवायुमंतरिक्षस्याधिपतिंवायुमंतरिक्षा
६२ स्याधिपतिंसूर्योदिवोधिपतिंचंद्रमसंनक्षत्राणामधिपतिंबृहस्पतिंब्रह्मणोधिपतिंमित्रंसत्यानामधिपतिंवरु
णमपामधिपतिंसमुद्रंस्रोत्यानामधिपतिमन्नं साम्राज्यानामधिपतिंसोममोषधिपतिंसवितारंप्रसवाना
63 मधिपतिंरुद्रंपशूनामधिपतिंत्वष्टारूपाणामधिपतिंविष्णुंपर्वतानामधिपतिंमरुतोगणानामधिपतीन्पि
तॄनपितामहानुपरानवरान्ततान्ततामहान्अग्निंअग्निंवैवस्वतंमृत्युंएतान्सर्वानाज्येनाहंपद्ये अथ
कन्यादेवतामिध्मानेकरोति अग्निंइमंगंलाजैरहंपद्ये अथवरः प्रजापतिंअग्निंस्विष्टकृतमाज्येनाहंपद्ये ततो
ब्रह्मोपवेशनादिचरुवर्जंपर्युक्षणान्तंकर्मकुर्यात् तत्रविशेषः आसादितपात्राणामुत्तरेशमीपत्रमिश्रालाजाः
अश्मा स्रुवंलोहितमानडुहंचर्मीकुमार्याभ्राता तदभावेसकुल्यः सूर्पींदृढपुरुषः वरस्येतिदक्षोभवति ६३

अग्निं

© Dharmartha Trust J&K. Digitized by eGangotri

नदासद्ब्रह्मासनोपकल्पने आचार्यायवरद्दव्ये पात्रासादनानंतरमेतान्युपकल्प्यप्रोक्षयेत् पर्युक्षणांते स्रुव
मादायदक्षिणंजान्वाच्यब्रह्मान्वारब्धउक्तविधिनाघारौकृत्वा: सकाशात्स्रुवेणाज्यमादायप्रजापतयेस्वाहा इदंप्रजाप
तये इंद्रायस्वाहा इदंमिंद्रा अग्नयेस्वाहा इदमग्नये सोमायस्वाहाइदंसोमाय भूर्भुवःस्वरितिमहाव्याहृतीनांप्रजा
पतिऋषिः क्रमेणगायत्र्युष्णिगनुष्टुप्छंदांसिअग्निवायुसूर्यादेवताहोमेविनियोगः भूःस्वाहा इदमग्नये भुवः
स्वाहा इदंवायवे स्वःस्वाहा इदंसूर्याय त्वन्नोअग्नेइतिवामदेवऋषिः त्रिष्टुप्छंदः अग्नीवरुणौदेवतेहोमेविनियो
गः त्वन्नोअग्ने·स्मात्स्वाहा: इदमग्नीवरुणाभ्यां सत्वन्नोअग्नेइतिवामदेवऋषिः त्रिष्टुप्छंदः अग्नीवरुणौदेवतेहोमेवि
नियोगः सत्वन्नो· ष्टधिस्वाहा इदमग्नीवरुणाभ्यां अयाश्चाग्नेइतिवामदेवऋषिः बृहतीछंदः अग्निर्देवताहोमेवि
नियोगः अयाश्चाजछंस्वाहा इदमग्नये येतेशतमितिवामदेवऋषिः त्रिष्टुप्छंदः वरुणसवितविष्णुर्विश्वे
देवा ······ स्वर्कादेवताहोमेविनियोगायतेशतेस्वकर्यस्वाहा इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरु

© Dharmartha Trust J&K. Digitized by eGangotri

---------- उद्वयमग्निमितिसुनाशेपऋषिः त्रिष्टुप्छन्दः ---------- नेदितियोगः उद ---------- स्वाहा इदंवरुणा
ॐ. याहिजये अथब्रह्मान्वारब्धागाष्टभृत्नीह्वोति तयथा ऋताषाडितिप्रजापतिऋषि साध्यावाऋषयः यजुः ऋ
६४ ताषाडनक्षमाग्निगंधर्वोदेवताहो. ऋताषाडनक्षमाग्निर्गंधर्वोसनइदंब्रह्मक्षत्रंपान्तुतस्मैस्वाहा वाट् इद
64 मृतासाहेऋतक्षम्नेग्नयेगंधर्वाय पुनःऋताषाडितिप्रजापतिऋषि यजुः ओषधयोप्सरसोमुदोदेवताहो.
ऋता गंधर्वस्तस्यौषधयोप्सरसोमुदोनामताभ्यःस्वाहा इदमोषधीभ्योप्सरोभ्योमुद्भ्यः सꣳहितमितिप्रजाप
ति ऋषिः यजुः संहितोविश्वसामासूर्योगंधर्वोदेवताहो. सꣳहितोविश्वसामासूर्योगंधर्वः सनः इदं
ब्रह्मक्षत्रंपान्तुतस्मैस्वाहावाट् इदंसंहितायविश्वसाम्नेसूर्यायगंधर्वाय संहितःतिप्रजापतिऋषिः यजुःम
रीचयोप्सरसः आयुवोदेवताहोमे सꣳहितोविश्वसामासूर्योगंधर्वस्तस्यमरीचयोप्सरसआयुवोनामताभ्यः
स्वाहा सुषुम्णाइति प्रजापतिऋषिः यजुः सूर्यरश्मिश्चन्द्रमागंधर्वोदेवता होमे सूर्यरश्मिश्चन्द्रमागंधर्वः सन ६४

© Dharmartha Trust J&K. Digitized by eGangotri

इदंब्रह्मक्षत्रंयात्तुनस्मैस्वाहावाट् इदंसूर्यरश्मयेचंद्रमसेगंधर्वाय सुषुम्णाइतिप्रजा० इदंमरीभ्योऽप्सरोभ्य आयुभ्यःनक्ष
त्राण्यप्सरसोभेकुरयोदेवताहोमे· सुषुम्णःसूर्यः गंधर्वस्तस्यनक्षत्राण्यप्सरसोभेकुरवोनामताभ्यःस्वाहा इदंनक्षत्रेभ्यो
सरोभ्योभेकुरिभ्यः इषिरइतिप्रजापतिऋषिःयजुःइषिरोविश्वव्यचावातोगंधर्वोदेवताहोमे· इषिरोविश्वव्यचा
वातोगंधर्वःसनःवाट् इदमिषिरायविश्वव्यचसेवातायगंधर्वाय इषिरइतिप्रजापतिऋषिःयजुः अद्भ्योप्सरो·
भ्यऊर्ग्भ्योदेवताहोमे· इदंअद्भ्योप्सरोभ्यःऊर्ग्भ्यः भुज्युरितिप्रजापतिऋषिःयजुःभुज्युःसुपर्णोयज्ञोगंधर्वोदेव
ताहोमे· भुज्युःसु·गंधर्वःसनइदंस्वाहावाट् इदंभुज्यवेसुपर्णायज्ञायगंधर्वाय भुज्युरितिप्रजापतिऋषिः
यजुःदक्षिणाप्सरसस्तावादेवताहोमे· भुज्युःसु· गंधर्वस्तस्यदक्षिणाअप्सरसस्तावानामताभ्यः स्वाहा इदंद
क्षिणाभ्योप्सरोभ्यस्तावाभ्यः प्रजापतिरितिप्रजापतिऋषिः यजुःप्रजापतिर्विश्वकर्मामनोगर्भादेवताः
हो· गंधर्वःसनइदंब्रह्मक्षत्रंपात्तुनस्मैस्वाहा वाट् इदंप्रजापतयेविश्वकर्मणेमनसेगंधर्वायपुनःप्रजापति

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ
६५

65

ऋषिः यजुः ऋतव नामाप्सरसोपष्टयोदेवताहो॰ प्रजापतिः गंधर्वस्तत्रऋक्सामान्यप्सरसएष्टयोनामताभ्यः स्वाहा
इदमृक्सामेभ्योप्सरेभ्यएष्टिभ्यः एवंस्रुवेणवादायाज्येनराष्ट्रभृद्धोमंकुर्या अपरेतमथामंत्रप्रयोगंकुर्वीत
तद्यथा ऋताषाडृतधामाग्निर्गंधर्वः सनइदंब्रह्मक्षत्रंपातु तस्मैस्वाहावाट् इतिप्रथमः तस्योषधयोमुदो
नामताभ्यःस्वाहेतिद्वितीयएवंसर्वमंत्रेषुत्यागः अस्मिन्पक्षेपित्यागास्तूतएव अथजयाहोमः चित्तं
चेत्यादिद्वादशमंत्राणांपरमेष्ठी ऋषिः सर्वाणियजूंषिलिंगोक्तादेवताहो॰ चित्तंचस्वाहा इदंचित्ताय चित्ति
श्चस्वाहा इदंचित्त्यै आकूतंचस्वाहा इदमाकूताय आकूतिश्चस्वाहा इदमाकूत्यै विज्ञातंचस्वाहा इदंविज्ञाता
य विज्ञातिश्चस्वाहा इदंविज्ञात्यै मनश्चस्वाहा इदंमनसे शाक्वरीश्चस्वाहा इदंशाक्वरीभ्य दर्शश्चस्वाहा इदंद
र्शाय पौर्णमासंचस्वाहा इदंपौर्णमासाय बृहच्चस्वाहा इदंबृहते रथंतरंचस्वाहा इदंरथंतराय रथंतरंचे
त्येतदंतानांपदानांवक्तव्यत्वेनप्रयोगमिच्छेति तदनुपपन्नं एतेमंत्राः नतुदेवतापदानिप्रजापतिर्जयानितिमं ६५

© Dharmartha Trust J&K. Digitized by eGangotri

नस्य परमेष्ठी ऋषिः त्रिष्टुप्छंदः लिंगोक्तादेवताहोः प्रजापतिर्जयानिंद्राय वृष्णेप्रायच्छदुग्रः पृतनाजेषु तस्मै
विशः समनमंतसर्वाः सउग्रः सहहव्योबभूवस्वाहा इदं प्रजापतये अथाभ्यातानहोमंकरोति तद्यथा अग्निर्भूतानामि
ति प्रजापतिऋषिः त्रिष्टुप्छंदः अग्निर्भूतानामधिपतिर्देवताहोः अग्निर्भूतानामधिपतिस्समावत्वस्मिन्ब्रह्मण्यस्मिं
स्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मण्यस्यांदेवहूत्यांः स्वाहा इदमग्नयेभूतानामधिपत
ये इंद्रोज्येष्ठानामधिपतिरितिप्रजापतिऋषिः त्रिष्टुप्छंदः इंद्रोज्येष्ठानामधिपतिर्देवताहोः इंद्रोज्येष्ठानामधि
पतिरितिप्रजापतिऋषिस्त्वाः स्वाहा इदमिंद्रायज्येष्ठानामधिपतये यमःपृथिव्याअधिपतिः त्वाः स्वाहा
इदं यमायपृथिव्याअधिपतयेउदकोपस्पर्शनंवायुरंतरिक्षस्याधिपतिरितिप्रजापतिःऋषिः त्रिष्टुप्छंदःवा
युरंतरिक्षस्याधिपतिर्देवताहोः वायुरंतरिक्षस्यास्त्वाः स्वाहा इदंवायवे अंतरिक्षस्याधिपतये सूर्यइतिप्रजा
पतिऋषिः त्रिष्टुप्छंदः सूर्योधिपतिर्देवताहोमः सूर्योदिवोधिस्वाहा इदंसूर्यायदिवोधिपतये चंद्रमान

© Dharmartha Trust J&K. Digitized by eGangotri

क्षत्राणामधिपतिरिति प्रजापतिऋषिः त्रिष्टुप्छंदः चंद्रमा नक्षत्राणामधिपतिर्देवताहोः चंद्रमानक्षत्राणामधि
पतिः संस्रा॰ स्वाहा इदं चंद्रमसे नक्षत्राणामधिपतये बृहस्पतिरिति प्रजापतिऋषिः त्रिष्टुप्छंदः बृहस्प
तिर्ब्रह्मणोधिपतिर्देवताहोः बृहस्पतिर्ब्रह्मणोधिपतिः समात्या॰ स्वाहा इदं बृहस्पतये ब्रह्मणोधिनपतये
मित्र इति प्रजापतिऋषिः त्रिष्टुप्छंदः मित्रः सत्यानामधिपतिर्देवताहोः मित्रः सत्यानामधिपतिः देवा
मासा॰ स्वाहा इदं मित्राय सत्यानामधिपतये वरुणोपामधिपतिरिति प्रजापतिऋषिः त्रिष्टुप्छंदः
।मित्रः सत्यानामधिपतिर्देवताहोः। वरुणोपामधिपतिदेवताहोः वरुणोपामधिपतिः समात्याः स्वाहा
वरुणोयापामधिपतये समुद्र इति प्रजापतिऋषिः त्रिष्टुप्छंदः समुद्रस्रोत्यानामधिपतिर्देवताहोः समु
द्रः स्रोत्यानामधिपतिः समा॰ त्यां स्वाहा इदं समुद्राय स्रोत्यानामधिपतये अन्नं॰ साम्राज्यानामधिपति
रिति प्रजापतिः ऋषि त्रिष्टुप्छंदः अन्नं साम्राज्यानामधिपतिर्देवताहोः अन्नं॰ साम्राज्यानामधिपतिः सत ८८

ओं. ८८

68

© Dharmartha Trust J&K. Digitized by eGangotri

मावत्तस्मिन्नुव्र॰ त्वा॰८॰ स्वाहा इदं मेनाय सम्राज्यानामधिपतये सोमर्षुषधीनामधिपतिरिति प्रजापतिऋषिः त्रिष्टुप्
छंदः सोमोंनुषधिपति दैवताहोः सोमस्त्रोषधीनामधिपतिः समा॰ त्वा॰८॰ स्वाहा इदं सोमाय ओषधीनामधि
पति (समा॰ त्वा॰८॰ स्वाहा) पेसविताप्रसवानामधिपतिरिति प्रजापतिऋषिः त्रिष्टुप्छंदः सविताप्रदानामधिप
तिः समासा॰८॰ स्वाहा इदं सवित्रे प्रसवानामधिपतये रुद्रः पशूनामधिपतिरिति प्रजापतिऋषिः त्रिष्टुप्छंदः रु
द्रः पशूनामधिपतिर्दैवताहोः रुद्रः पशूनामधिपतिः समा॰ त्वा॰८॰ स्वाहा इदं रुद्राय पशूनामाधिपतये आपस्त्वष्टा
त्वष्टारूपाणामधिपतिरिति प्रजापतिऋषिः त्रिष्टुप्छंदः त्वष्टारूपाणामधिपतिर्दैवताहोः त्वष्टारूपाण॰ त्वा॰८॰ स्वा
हा इदं त्वष्ट्रे रूपाणामधिपतये विष्णुः पर्वतानामधिपतिर्दैवताहोः विष्णुः पर्वतानामधिपतिः त्वा॰८॰ स्वाहा इदं वि
ष्णवे पर्वतानामधिपतये मरुतोगणानामित्यस्य प्रजापतिऋषिः त्रिष्टुप्छंदः मरुतो देवतो गणानामधिपतिर्दैव
ताहोः मरुतोगणानामधिपतयस्तेमावेत्त॰ त्वा॰८॰ स्वाहा इदं मरुद्भ्यो गणानापतिभ्यः पितरः पितामहाः परेवरे

© Dharmartha Trust J&K. Digitized by eGangotri

ततास्तांस्ततामहाः इदमावेतत्पार्ठं स्वाहा इदंपितृभ्यः पितामहेभ्यः परेभ्योवरेभ्यः ततेभ्यस्ततामहेभ्यः उदकोप
ॐ. स्पर्शने अग्निरैत्वितिप्रजापतिऋषिः त्रिष्टुप्छंदः अग्निर्देवताहोमेविनियोगः अग्निरैतुप्रथमोदेवतानाꣳ सोस्यै
६७ प्रजांमुंचतुमृत्युपाशात् तदयꣳ राजावरुणोनुमन्यतांयथेयꣳ स्त्रीपौत्रमघंनरोदात्स्वाहा इदंमग्नये इदंमग्निरि
67 प्रजापतिऋषिः त्रिष्टुप्छंदः अग्निर्देवताहो इमामग्निस्त्रायतांगार्हपत्यः प्रजामस्यैनयतु दीर्घमायुः अशून्यो
पस्थाजीवतामस्तुमातापौत्रमानंदमभिविबुध्यतामियꣳ स्वाहा इदमग्नये स्वस्तिन्वइतिप्रजापतिऋषिस्त्रिष्टुप्
छंदः अग्निर्देवताहोः स्वस्तिनोअग्नेदिवापृथिव्याविश्वानिधेह्ययथायजत्र यदस्यांमहिदिविजातेप्रशस्तंतद
स्मासुद्रविणंधेहिचित्रस्वाहा इदमग्नये स्वर्गंनयेयामितिप्रजापतिऋषिः त्रिष्टुप्छंदः वैवस्वतोदेवताहोः स्वर्गं
नयेअंप्रविशेनयहिज्योतिष्मच्छेस्मजरेनआयुः अपैतुमृत्युरमृतंमआगाद्वैवस्वतोनोअभयेपहरावोतुनः स्वाहा इ
दंवैवस्वताया परंमृत्यविनिसंकतस्यऋषिः त्रिष्टुप्छंदः मृत्युदेवताहोः परंमृत्योअनुपरेहिपंथांयस्तेअन्यइतरोः ६७

© Dharmartha Trust J&K. Digitized by eGangotri

देवयानात् वक्तव्यमनेऽश्नुवते तेऽब्रवीमिमानः प्रजा धेशरीरिषीमोतदीरानूस्वाहा इदंमृत्यवे के विल्याशनाहूर्ढ्वेपरे मृतवि
जीढ्वेति अथकुमार्याभ्रातातदभावे सकुल्यः शूर्पकृतीलाजानस्वेनांजलिनामादायांजलावयति तान् लाजानुप्राङ्
मुखीकुमारीअंजलिनावग्राहेजुहोति तद्यथा अर्यमणमित्यापर्वणऋषिः अनुष्टुप्छंदः अग्निर्देवतालाजाहोमे
विः अर्यमणंदेवंकन्याअग्निमवेदत स नोअर्यमादेवः प्रेतोमेचनमापतेस्वाहा इत्यनेनमंत्रेणांजलिस्थितलाजा
नांतृतीयांशंजुहोति इदमग्नेये अर्यम्णोवा इयंनार्युपब्रूतइत्याथर्वणऋषिः अनुष्टुप्छंदः अग्निर्देवताहोः
इयंनार्युपब्रूतेलाजानावपंतिका आयुष्मानस्तुमेपतिरेधंतीजातयोमम स्वाहेत्यनेनार्धंजुहोति इदमग्न
ये इमां........ ....त्याथर्वणऋषिः अनुष्टुप्छंदः अग्निर्देवतालाजाहोमेविनियोगः इमान्....
....ननेतदग्निरनुमन्यतामियंस्वाहेत्यनेनमंत्रेणांजलिस्थान् लाजान्सर्वान्हुत्वा
इदमग्नयेइतिद्रव्यंत्यजति तेत्रत्रयकस्यैवपठति अथवरः कन्यायादक्षिणंहस्तंसांगुष्टमनेनमंत्रेणगृह्णाति गृभ्णा

© Dharmartha Trust J&K. Digitized by eGangotri

मित इत्यादीनां चतुर्स्रीयाज्ञवल्क्यभरद्वाजाथर्वणप्रजापतिरृषिः तत्राद्यानां त्रयाणां त्रिष्टुप् उत्तमिकस्यानुष्टुप्छं
डों॰ दोति चतुर्थ्ये यजुः पाणिग्रहणे विनियोगः गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः भगो अर्यमा
६८ सविता पुरंधीर्मह्यं त्वादुर्गार्हपत्याय देवाः अमोहमस्मि सा त्वं सा त्वमस्यमोऽहं सामाहमस्मि ऋक्त्वं द्यौरहं
68 पृथिवी त्वं तावेहि विवहावहै सह रेतो दधावहै प्रजां प्रजनयावहै पुत्रान् विंदावहै बहून् ते संतु जरदष्ट
यः संप्रियौ रोचिष्णू सुमनस्यमानौ पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतं मित्येभिर्मं
त्रैः अग्नेरुत्तरतो गत्वा तत्र वरो वधा दक्षिणपाणादं सं अश्मानं न गृहीत्वा दक्षिणेन वा पूर्वोपकल्पितदृषद
उपरि करोति आरोहेममश्मानमित्याथर्वणऋषिः त्रिष्टुप्छंदः वधूदेव अश्मारोहणे विनियोगः आरोहेमम
श्मानमश्मेव त्वं स्थिरा भव अभितिष्ठ पृतन्यतोऽवबाधस्व पृतनायतः अनेन मंत्रेण अथाश्मन्या हृदयांकु
मार्यो वरो गाथां गायति सरस्वति प्रेदमव इति विश्वावसु ऋषिः अनुष्टुप्छंदः सरस्वती देवता गाने विनियो ६८

© Dharmartha Trust J&K. Digitized by eGangotri

गः सरस्वतिप्रेदमवसुभगे वाजिनीवति यांत्वाविश्वस्यभूतस्यप्रजायामस्याग्रतः यस्यांभूतंसमभवद्यस्यांविश्वमि
दंजगत् तामद्यगाथांगास्यामियास्त्रीणामुत्तमंयशः इत्येतदंते अथवधूवरोग्नीप्रदक्षिणीकुरुतः तुभ्यमग्रे।इ
त्याथर्वणऋषिः अनुष्टुप्छंदः अग्निर्देवतापरिक्रमणेविनियोगः तुभ्यमग्रेपर्यवहन्त्सूर्यांवहतुनासह पुनःप
तिभ्योजायांदाअग्नेप्रजयासहेत्यनेनवरपठितेनमंत्रेणएवंलाजादिपरिक्रमणंतंपुनर्वारद्वयंकर्मकुर्यात् ततस्तृती
यपरिक्रमणानंतरंसूर्यकोणप्रदेशेनकुमार्याभ्राताकुमार्यंजलौसर्वांल्लाजानावपति कुमारीतिष्ठतीलाजान्
सर्वान्जुहोति भगायस्वाहेतिमंत्रस्य कर्कोपाध्यायस्तुग्रावपतेप्पमुमेत्रमंत्रप्रयुंक्ते इदंभगायेतित्यागः स
मावाराल्लुंलीवतुर्थेपरिक्रमणेकुरुतः नेतरथाहृतिः त्रिःपरिणीतामितिग्रहणात् तथाचोक्तंपरिभाषायां
विहस्याहुत्यवेतरथाहृतिः तथापरिक्रमणं दंपत्योर्गच्छतोस्तत्रब्रह्माग्नीन्द्रेतरागतिरेणः यद्वा वतुर्थेपरिक्रम
णवर्जेब्रह्माग्नीन्द्रेतरागतिरेर्भवेत् नैवेविवारयेत् नवावोदितत्वादितिभाषास्तत्वात् ततःप्रजापतयेस्वाहेति

© Dharmartha Trust J&K. Digitized by eGangotri

प्रजापत्यंहोमः इदंप्रजापतये अथवधूमुदङ्मुखींपरिक्रामयविदः एकमिषेविष्णुस्त्वानयतुइति वरेणैकमंत्रेणवधू
ॐ। रेकंपादमुदग्गृह्णातितदग्रेणद्वेऊर्जेविष्णुस्त्वानयतुइतिद्वितीये ततःत्रीणिरायस्पोषायविष्णुस्त्वानयतुइतितृतीयं तद
६१ ग्रेणचत्वारिमायोभवायविष्णुस्त्वानयतुइतिचतुर्थं ततःपंचपशुभ्योविष्णुस्त्वानयतुइतिपंचमा तदग्रेणषड्ऋतुभ्योविष्णु
स्त्वानयतुइतिषष्ठेतदग्रेणसप्तसप्तपदाभवसामामनुव्रताभवविष्णुस्त्वानयतुइतिसप्तमं अथवरस्कंधेवधाउदकुं
69 भादाक्षिणहस्तेनादायवधूमूर्धन्यभिषिंचति आपःशिवाइतिप्रजापतिऋषिः यजुः लिंगोक्तादेवतामूर्धाभिषेच
नेविनियोगः आपःशिवाःशिवतमाःशांताःशांततमास्तास्तेकृण्वंतुभेषजमित्यनेनमंत्रेण तथैवपुनरुदक
मादायआपोहिष्ठेतिऋचस्यसिंधुद्वीपऋषिः गायत्रीछंदः आपोदेवतामूर्धाभिषेचनेविनियोगः आपोहि
ष्ठेत्यादिआपोजनयथाचनइत्यंतेनतिसृभिर्वधूमूर्धन्यभिषिंचति अथवरोवधूंसूर्यमुदीक्षयति सूर्यमुदीक्ष
स्वेति प्रेषितासतीसूर्यमुदीक्षेत तच्चक्षुरितिमंत्रस्य दध्यङाथर्वणऋषिः पुरउष्णिकछंदः सूर्योदेवतासूर्या ६१

© Dharmartha Trust J&K. Digitized by eGangotri

वेक्षणेविनियोगः तच्चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्चरत् पश्येमशरदः शतंजीवेमशरदः शतं शृणुयामशरदः शतं
प्रब्रवामशरदः शतं अदीनास्यामशरदः शतंभूयश्चशरदः शतादितिमंत्रेण वधायवमंत्रपाठः दिवाविवाहेसूर्यो
दीक्षणंभवेत् ततोवरः ध्वदक्षिणस्कंधोपरिदक्षिणहस्तंनीत्वातस्याहृदयमालभते ममव्रतेतइतिऋषिः प्रजापति
ऋषिः त्रिष्टुप्छंदः प्रजापतिर्देवताहृदयालंभनेविनियोगः ममव्रतेतेहृदयंदधामिममचित्तमनुचित्तंतेस्तुयमम
वाचमेकमनाजुषस्व प्रजापतिष्ट्वानियुक्तमह्यमित्यनेनमंत्रेण ततोवरोवधूमभिमंत्रयते सुमंगलीरितिप्रजाप
तिऋषिः अनुष्टुप्छंदः लिंगोक्तादेवताअभिमंत्रणेविनियोगः सुमंगलीरियंवधूरिमांसमेतपश्यत सौभा
ग्यमस्यैदत्वायथास्तंविपरेत्यनेनमंत्रेण अत्रसमावारोहधूर्वरस्यवामभागेउपवेशयति वधूमस्तानंतेवरःसिंदूरं
ददाति ततोग्नेःप्राच्यांदिशिअनुलिप्तेअग्रागाढेअनडुहेचर्मणिलोहितेप्राकग्रीवेउत्तरलोम्नितौवधूवरौपुरुषः
उत्थाप्योपविशति इहगावइतिप्रजापतिऋषिः अनुष्टुप्छंदः लिंगोक्तादेवताउपवेशनेविनियोगः इह

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ· ७०

गावोनिषिदेतिहाथ्याः इह पुरुषः इहो सहस्रदक्षिणो यज्ञः इह पूषा निषीदंतित्ति मंत्रेण ततः आगत्य पूर्ववद्यथास्थानमुपविश्य प्र
स्थान्वारब्धो वरः अग्नये स्विष्टकृते स्वाहेति हुत्वा इदमग्नये स्विष्टकृते इत्यागं निधमनंतत संस्रवप्राशने पवित्राभ्यामार्ज
नं पूर्णपात्रदाने ब्रह्मन् अस्य होमस्य सांगतया सिद्ध्यर्थं इदं पूर्णपात्रं तुभ्यमहं संप्रददे वरः ॐस्वस्तीत्युक्काद्यौ स्वाप्र
तिगृह्णामीति पठेत् प्रणीताविमोकः ततः स्वकीयायाचार्याय वरं ददाति यदि ब्राह्मणो वरः तदाचार्याय गां ददाति
क्षत्रियश्चेद्ग्रामं वैश्यश्चेदश्वं अन्यच्च यथाशक्ति सुवर्णादिद्रव्यं ब्राह्मणेभ्यो दद्यात् दशब्राह्मणभोजनसंकल्प्य ग्राम·
वचनेव कुर्युरित्यनेन यथाकुलाचारे तिलककरणालंकृतवंदनादि विप्राशीर्वचनमंत्रपाठादिकं संगृह्णाते अथ यदि
कश्चिदज्ञानको कन्यामुद्वहेत् तदा तस्याः पित्रे ऽधिकं गवां शतं दत्वोद्वाहयेत् एतेन सर्वविकादोषान्मुच्यते
दिवाविवाहश्चेद्रजनिते ध्रुवं दर्शयति रात्रौ चेदूरदानानंतरो ततो ध्रुवमीक्षस्वेति वरो वध्वं प्रेषयति स्पर्शप्रे·
षिता सता ध्रुवमसीति प्रजापतिऋषिः पंक्तिश्छंदः ध्रुवो देवता ध्रुवावेक्षणे विनियोगः ध्रुवमसि ध्रुवेत्वा पश्या ७·

© Dharmartha Trust J&K. Digitized by eGangotri

मिश्रंवेधिपोष्येमपिमह्यंत्वादात्बृहस्पतिर्मयापत्याप्रजापतीसजीवशारदः शतमित्यनेनमंत्रेणोदीक्षते वध्यमेव
मंत्रपाठः सायदिश्रवेनपश्योतदापश्यौमीत्येवब्रूयात् विवाहादारभ्यत्रिरात्रमक्षारलवणाशिनौस्यातांजाया
पती क्षारेसाकादिलवणेसैंधवादि रेणः एकपात्रेमहाश्रीयातांकेचित्तुप्रथमेहनि प[illegible]योवर्जंहविष्यान्नमित्य
चेवत्त्रिविक्रमः अधःषट्वादिरहितेभूभागेकटादिनास्वास्तृतेत्रिरात्रमेवंशयीता त्रिरात्रेविवाहादारभ्यगमि
षुनैवेयातां अस्मिनेवत्रिरात्रयक्षेअश्रीयमाणेवतुर्थ्युत्तरकालेपर्वम्पारात्रावभिगमनेकर्तव्यं ऊतएतत् चतुर्थी
कर्मणायकृतेभार्यात्वमेवनास्त्यपिसंवृत्ते तस्माद्विवाहेवदेशात्त्वाद्वतुर्थीकर्मणः इतिश्रीमहाशिवदीक्षितसुत
काशीदीक्षितकृतेप्रयोगरत्नेविवाहप्रयोगः अथविवाहाच्चतुर्थेदिनरात्रौतत्रभद्रादिसंभवेदिनएववाशिष्टा
चारशान्तेवरमात्रेतत्समायैवापरिणयदत्तद्वेषोडशाम्रपूर्यंयुतमहावंशपात्रदानेकार्यं कन्यायात्रा सवस्त्रफल
तांबूलेदंपत्योर्वेशाबद्धेते एवंविरण्णास्त्रवंशपात्रेयकान्तैः परिधारिते करकैरुद्गसंख्याकैः सवस्त्रपरिधारितैः

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ. ७१

एवरस्यतत्पितृमात्रादीन्सेवनतत्पदीनेणांयथाव भवंवस्त्रादिपूजनमहंकरिष्ये इतिसंकल्प्यवरंतत्पितृमातृभ्रात्रादि
भ्यः क्रमेणयथाविभवंपदपदीदुकूलवस्त्रादिदत्वापुनस्त्रिलादिसंकरिष्ये परिणीतप्रसादेमहेशो गिरिजापतिः
अतस्त्वांपूजयिष्यामिपरिणीसर्वकामदो भवस्त्वावमदीयावस्त्राद्यैः षोडशाभिर्हतो वरमात्रेप्रस्यामिकन्यादानस
सिद्धये इतिसंकल्प्यमहावेशपात्रेउमामहेश्वरौषोडशोपचारैः पूजयित्वावेशपात्रंवरमात्रेदत्वामंत्रान्पठेत् वे
शो वेशाकरः श्रेष्ठावेशो वेशसमुद्भवः अनेनवेशदानेनतुष्टोस्तु हिंकरोतुमे इतिवेशपात्रमिदंपुण्यंवेशजातस
मुद्भवंवेशानामुत्तमंदानमतःशान्तिंप्रयच्छमे वेशपात्राणिसर्वाणिमयासंपादितानिवै उमाकान्तायदत्तानिम
मगोत्रात्रिवृद्धये वेशाद्दिकरंदानंसौभाग्यादिसमन्विते वस्त्रेणाच्छादितंभगफलहोमसमन्वितो सर्वपा
पक्षयकरंनानाद्रव्यैरुपस्कृते दानानामुत्तमंदानमतःशान्तिमप्रच्छमेइति ततःकन्यापरपितृमातृउत्से
गयोः पृथक्पृथगुपवेश्यपृथक्ततोप्रार्थयेत् अष्टावरमात्रावधूमात्रातत्पदसुवासिनीभ्यः सकंचुकः द्रव्यवेशश्च ७१

© Dharmartha Trust J&K. Digitized by eGangotri

र्यवागणदानादिवधाकारिणीयतित्यायावारश्रामेयथावारंत्तेयो ------ रिणीधृनादिवस्त्रपितृभ्यायभक्तावञ्चोक्त
त्वाभोजनंकार्यमितिप्रयोगरत्नेपरिणीधूजादिवतुर्थादिनकृत्यं अथवतुर्थीकर्मोच्यतेविवाहदिवसाच्चतुर्थ्याम
पररात्रौस्नानंकृत्वाष्टस्तम्भमध्येपंचभूसंस्कारान्कृत्वाविवाहाग्नेः स्थापनंवरःकुर्यात् ततोवधूर्वरौपश्चादग्नेरुपविश
तः दक्षिणतोवधूः उत्तरतोवरः ततःप्राणानायम्यदेशकालौस्मृत्वाविवाहोगचतुर्थीकर्महंकरिष्ये इतिसंकल्प्य
कृत्वावैकल्पिकावधारणंकरोति पूर्ववेणव स्तणोगमने उत्तरेणपात्रासादनं द्वेपवित्रे ताम्रमयीआज्यस्थाली
ताम्रमयीचरुस्थाली पालाशः समिधः प्रोक्षावाधारौ समिद्दतमेआज्यभागौ पूर्णपात्रंदक्षिणा एतान्वैक
ल्पिकान्पदार्थानहंकरिष्ये ततोदेवताभिध्याने प्रजापतिं इंद्रं अग्निं सोमं आज्येन अग्निं वायुं सूर्यं चंद्रमसं
गंधर्वं आज्येनाहंयक्ष्ये प्रजापतिंवरुणं शेषेणस्विष्टकृतं अग्निं वायुं सूर्यं अग्नीवरुणौ अग्नीवरुणौ अग्निं वरु
णंसवितारं विष्णुं विश्वान्देवान्मरुतः स्वर्कान् वरुणं प्रजापतिं एताः पुनराज्येन एताप्रधानार्थादेवताअस्मि

© Dharmartha Trust J&K. Digitized by eGangotri

न्कर्मेस्म्यहं यद्योनतो ब्राह्मणवरणं अस्य कर्मणोऽस्मिन्कर्मणि त्वं ब्रह्मा भव भवामीत्युक्त्वा ब्रह्मा ब्रह्मासने उपवि
ॐ. शेत् तत्र प्रणीताखाना उत्तरतो वारिपूर्णमुदकपात्रं न्यसेत् तदुदकपात्रमग्नेर्मध्ये प्रणीताप्रणयने परिस्त
७२ रणमाज्यभागौ तं पूर्ववत् अग्नेः प्रायश्चित्तिरित्यादि पंचानां परमेष्ठी ऋषिः त्रिष्टुप् छंदः लिंगोक्ता देवता हो
मे विनियोगः अग्नेः प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्य पतिघ्नी तनूस्
72 तामस्यै नाशय स्वाहा इदमग्नये वायोः प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावा
मे यास्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा इदं वायवे सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा
नाथकाम उपधावामि यास्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा इदं सूर्याय चंद्र प्रायश्चित्ते त्वं देवानां प्रायश्चि
त्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै गृहघ्नी तनूस्तामस्यै नाशय स्वाहा इदं चंद्रमसे गंधर्व प्रायश्चि
त्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै यशोघ्नी तनूस्तामस्यै नाशय स्वाहा इदं गंधर्वा ७२

© Dharmartha Trust J&K. Digitized by eGangotri

याऽर्थ्वमार्ज्यनहोमंकत्वास्थालीपाकेमप्रजापतये इतिमेध्यातिथिऋषिः अनुष्टुप्छंदः प्रजापतिर्देवताहोमेवि
नियोगः ॐप्रजापतयेस्वाहा इदंप्रजापतये अग्नये इत्यादीनांप्रजापत्यंतानांषडाहुतीनामुदपात्रेसंस्रवादिपेत्
ततोऽग्नयेस्विष्टकृतेस्वाहा केविन्नस्विष्टकृतेपिसंस्रवमुदपात्रेक्षिपेति इदमग्नयेस्विष्टकृतेभूर्भुवःस्वरितिम
हाव्याहृतीनांप्रजापतिऋषिःक्रमेणगायत्र्युष्णिगनुष्टुप्छंदांसिअग्निवायुसूर्यादेवताहोमेविनियोगः भूः
स्वाहा इदमग्नये भुवःस्वाहा इदंवायवे स्वःस्वाहा इदंसूर्याय त्वंनोअग्नि इतिवामदेवऋषिः त्रिष्टुप्छंदः अ
ग्निवरुणौदेवतेहोमेविनियोगः अयाश्चाग्ने॰ जं॰ स्वाहा इदमग्नये येतेशतमितिवामदेवऋषिःत्रिष्टुप्छंदः
वरुणःसविताविष्णुविश्वेदेवामरुतःस्वर्कादेवताहोमेविनियोगः येतेशतं॰स्वर्काःस्वाहा इदंवरुणायसवित्रे
विष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यश्च उदुत्तमं॰ स्यामस्वाहा इदंवरुणाय प्रजापतयेस्वाहा इदंप्रजाप
तये ततःसंस्रवप्राशने पवित्राभ्योमार्जने पवित्रप्रतिपत्तिः ब्रह्मणेपूर्णपात्रं ब्रह्मइदंपूर्णपात्रंतुभ्यमहं

© Dharmartha Trust J&K. Digitized by eGangotri

सेप्रददे प्रणीताविमोकः ततउदपात्रादुदकमादाय वधूंमूर्द्धन्यभिषिंचति। यातइतिप्रजापतिऋषिः त्रिष्टुप्छंदः व
ॐ धूर्देवता अभिषेचनेविनियोगः यातेपतिघ्नीप्रजाघ्नीपशुघ्नीपशोघ्नीनिंदितातनूर्जारघ्नीततएनांकरोमिसाजी
र्यतेमयासहेत्यमुकिदिवान्यनेनमंत्रेण अथवरोवधूंस्थालीपाकेहुतशेषंप्राशयतिसहप्राणैरितिप्रजा
73 पतिऋषिः यजुः वधूर्देवता स्थालीपाकस्यशेषप्राशनेविनियोगः प्राणैस्तेप्राणान्संदधाम्यस्थिभिरस्थीनि
मांसैर्मांसानित्वचात्वचमित्यनेनमंत्रेण साचभर्त्रामंत्रेपठितेप्राश्नाति तावपुब्रह्मचर्यमाचरेत्ततस्त्र्याव
सथ्याधर्मनचेत्करोतीतितदात्र्यावसथ्यानेकुर्यात् इतिप्रयोगरत्नेचतुर्थीकर्मप्रयोगः अथदेवकोत्थापनमंड
पोद्वासनविधिः तत्रकालः समेचदिवसेकुर्याद्देवतोत्थापनंबुधः षष्ठेचविषमेनेष्टंविमुक्त्वापंचसप्तमौ
समेषुषष्ठंविषमेषुपंचमसप्तमातिरिक्तंदिनेनात्रेष्टमित्यर्थः उक्तकालेमंडपांतः सपत्नीकः स्वासनेउपविश्या
चमनप्राणायामदेशकालसंकीर्तनानिकृत्वाअथविवाहांगत्वेनस्थापितदेवतानामुत्थापनंमंडपोद्वासनंचकरिष्ये २

© Dharmartha Trust J&K. Digitized by eGangotri

हवावनवकरिष्ये इतिसंकल्प्य सर्वदेवताः प्रत्यहवत्पूजयित्वाउत्तिष्ठब्रह्मणस्पतेउत्थावेनं यांतुदेवगणाः सर्वेपूजामा
दायमत्तलात् ऋद्धिंवविपुलांदत्वापुनरागमनायच इतिविसर्ज्य भगवत्पादीनांतस्मैलाभ्येगोद्धर्मनोस्मोदकस्नाना
निकारयित्वावेष्टनसूत्रमुन्मुच्यसर्वाण्णिवावनंकुर्यात् ततोद्विजैरभिषेकः कार्यः अभिषेकोत्रपुरोक्तस्तच्छाखावादि
वेशपात्रेनिधायतदुपरिप्रादिशाभिन्नेलेसजटेवपूजमानशिरसिवद्धांजलिरस्तुब्राह्मणषट्त्रिषत्कुमासेषुशोभनम
स्त्विति द्विजान्प्रार्थयेत् नैवतथास्त्विति ब्रूयुः ततोद्विजान्वंदनेनाब्बलदक्षिणादिनापूजयित्वातदाशिषोमंत्रो
क्तागृह्णीयादित्यादिदेशकुलाचारानुसारेणज्ञेयाइतिप्रयोगरत्नेदेवतास्थापनं अथवर्षः प्रथमगृहप्रवेशः
वधूप्रवेशः प्रथमतृतीयेशुभप्रदः पंचमकेथवाहि: द्वितीयकेवाथवतुर्थकेवाषष्ठेवियोगोमरणंडः खदःस्यात्
लब्धः सभवनपुरप्रवेशोदेशानांविप्लवेनतथोद्वाहे नववधूगृहगमनेप्रतिशुक्रविचारणानास्ति मांडव्यः निज
यानेगृहेजीर्णेप्रासनोत्तेशुसमभे वधूप्रवेशमांगल्येनमौढ्यंगुरुशुक्रयोः ज्योतिःप्रकाशे वामेशुक्रेनवोढा

© Dharmartha Trust J&K. Digitized by eGangotri

डों.
७४
७४

याः स्त्रिवेहानिस्मदक्षिणे यनेफल्ग्वे वसहे क्षे सर्वनाशाः प्रकीर्तिताः। नवोढायास्त्रिवेषु वर्षं पञ्चके समध्येस्तुगो नदेवं वि
दुर्थेरीयकेवलं तद्विरागमे पूर्वतोऽभ्युदिते शुक्रे प्रयायाद्दक्षिणापरे पश्चादभ्युदिते चैव यापात्यत्रैवोत्तरे दिशि तथा
भाद्रपदमारभ्य पूर्वादिमुख्यादिदिक्षु प्रतिदिशं मासत्रयं कपाटं ज्ञेयो चैत्रमारभ्य पूर्वादिश्रष्ट दिक्क्रमात् मुख्यादि दिमास
द्वयं विदिक्षु कें मासैक्रमेण कपाटकं जानीयात् इति द्वयं ग्रामोऽन्तरे नववधूगमने वर्ज्यो नियतकालेपि कदा
चिन्निषेधमाह गर्गः व्यतीपाते च संक्रान्तौ ग्रहणे वैधृतावपि श्राद्धे विना शुभेनैव प्राप्तकालेपि मानवः न
था अमासेक्रान्ति विष्ट्यादौ प्राप्तेकालेपि नाचरेत् इति ग्रानोभद्राः स्वस्ति नइन्द्रो इति वधू गृहं प्रवेश्य सवधूको वरोग
णपतीलक्ष्मीनयथ्यावारसंपूज्य पुण्याहं वाचयित्वा विप्राशिषो गृह्णीयात्॥ विवाहात् प्रथमे पौषे आषाढे वा
पिमासके भर्तुर्गृहे वसेन्नस्त्री चैत्रे तातगृहे तथा इति प्रयोगरत्ने वधूगृहगमनविधिः अथ विवाहे अशौचादि
निर्णयः विधिवत्कृते कन्यावरणे त्रिरात्रादिव्रतसमाप्तिपर्यन्ते मध्ये अशौचप्राप्तौ तदयोयस्य यः शौचं वदि ७४

कोकारश्चाह तत्रयाज्ञवल्क्यः दानेविवाहेयज्ञेवसंग्रामेदेशविप्लवे आपद्यपिचकष्टायांसद्यःशौचंविधीयते इति दातुर्वरस्यकन्यायाश्चसद्यःशौचविवाहेत्यर्थः बृहस्पतिः विवाहोत्सवयज्ञेषुत्वंतरामृतसूतके पूर्वसंकल्पितार्थे षुनदोषःपरिकीर्तितः षट्त्रिंशन्मते विवाहः परैरन्नप्रदातव्यंभोक्तव्यंचद्विजोत्तमैः विष्णुः व्रतयज्ञविवाहेषुश्रा द्धेहोमेर्चनेजपे प्रारब्धेसूतकंनस्यादनारब्धेतुसूतकं प्रारंभश्चतेनेवोक्तः प्रारंभोवरणंयज्ञेसंकल्पोव्रतसत्र योः नांदीमुखेविवाहादौश्राद्धेपाकपरिक्रियेति नांदीमुखावधिश्चावश्यकः तथिकडक्तः एकविंशत्यहैर्यज्ञे विवाहेदशवासराः त्रिषट्चौलोपनयनेनांदीश्राद्धेविधीयतेइति तेनएकविंशत्याघहरंतःपतितेयाया ज्ञादिभवतितथाश्चावश्यकेयज्ञादौपूर्णंवैश्राद्धेकुर्यादित्यर्थः प्रारंभाभावेपिकन्यापाश्चार्यत्वेसंनिहित लग्नांतराभावेवहोमादिपूर्वकंविस्तरतुत्तामाह अनारब्धविशुद्ध्यर्थंकूष्मांडैर्जुहुयाद्घृतं गांदद्यात्पंचगव्यंवा पीततःशुद्ध्यतिसूतकीति कल्पितेसंभारस्यापिसंनिहितलग्नांतराभावेनसंभावेरक्षारणाशक्तौसद्यःशौचंवाभा

© Dharmartha Trust J&K. Digitized by eGangotri

वस्पहविस्तुः नहेवप्रतिष्ठाविवाहयोः पूर्वसंभूतयोरिति अथाववाहकालेकन्याऋतुमतीनेत्रत्रे हय तुप्राप्ते
ॐ विवाहेवितनेतेत्रेहोमकालेउपस्थिते कन्याऋतुमतीदृष्टाकथंकुर्वीतियाज्ञिकाः स्नापयित्वातुतांकन्यामर्
७५ चयित्वायथाविधि युंजानमाहुतींहुत्वाततःकर्माणियोजयेत् यद्वा विवाहहोमेप्रक्रांतेयदिकन्यारजस्वला
त्रिरात्रंदंपतीस्यातांपृथक्शय्याशनाशनौ चतुर्थेऽहनिसंप्राप्ते तस्मिन्नग्नौयथाविधीतिजुहुयामितिशेषः
75 इतिविवाहेआशौचादिनिर्णयः अथप्रसंगात्पुनर्विवाहउच्यते कृतेविवाहेयदिवागमुहिराहित्यादिदोषश्चेत्
जातस्तदाज्योतिःशास्त्रोक्तकालविशेषेपुनर्विवाहःकार्यः तदाहनृसिंहः श्रीधरीयेपुनर्विवाहंवक्ष्यामिदंप
त्योःशुभहृद्धिदं लग्नेंडलग्नयोऽस्मिषेग्रहतारादिसंभवे विवाहेवापिदेपत्यासत्सवादिसमुद्भवे तस्यदोषस्य
शांत्यर्थंपुनर्वैवाहमिष्यते अयनेचोत्तरेश्रेष्ठंवहयेतुविशेषतः आषाढमार्गशीर्षेहौवर्ज्योशेषाःशुभाव
हाः विवाहोक्तदोतिथ्येशशागिवासदिवर्गशः केरणयोगसंज्ञानिग्रहणोवरयोगकाः तस्मिन्विवाहसम ७५

© Dharmartha Trust J&K. Digitized by eGangotri

येशुभदाश्चतथैवहि पूर्वाह्णे पूर्वरात्रेव विवाहः शुभवेदिति अथद्वितीयादिविवाहविधि तत्राधिवेदनीयाश्च
हयाज्ञवल्क्यः सुरापीव्याधिताधूर्त्तावंध्यार्थघ्न्यप्रियंवदाः स्त्रीप्रसूश्चाधिवेत्तव्यापुरुषद्वेषिणीतथा अधिवि
न्नातुभर्त्तव्यामहदेनोन्यथाभवेत् अधिवेत्तव्यातत्तुराहाथवंध्याष्टमेवर्षे स्त्रीप्रजोद्वादशेतुमृतप्रजा एकाद
शेस्त्रीजननीसद्यस्त्वप्रियवादिनीति संग्रहेतु अप्रजांदशमेवर्षे स्त्रीप्रजांद्वादशेत्यजेत् मृतप्रजांपंचदशे
त्यजेत् मृतप्रजांपंचदशेसद्यस्त्वप्रियवादिनी अरत्यर्थेतुविवाहांतरेविशेषः एवमुक्तामप्यकामोमन्या
लब्धुंयद्यद्भृच्छति समर्थस्तोषयित्वार्थैः पूर्वोढामपरांवहेत् याज्ञवल्क्यस्तु आज्ञासंपादिनीदक्षावीरसू
प्रियवादिनी त्यजन्दाप्यस्तृतीयांशमधनोभरणंस्त्रियः सधनोधनतृतीयांशमधनोशयनाच्छादनान्न
कंभरणंदाप्यइत्यर्थः यास्तेतावताः परिणीताःगृहान्निर्गच्छेत्तांप्रत्याहमनुः अधिविन्नातुयानारीनिर्गच्छे
द्रोषितागृहात् सासद्यःसंनिरोद्धव्यात्याज्यावाकुलसन्निधाविति बहुभार्योज्येष्ठयैवसहधर्मंसपत्नीक

© Dharmartha Trust J&K. Digitized by eGangotri

साध्यंकुर्यादिति हेमाद्रौकात्यायनः अग्निशिष्टादिशुश्रूषांबहुभार्यःसवर्णया कारयेत्तद्बहुत्वेज्येष्ठयागर्हिता
ॐ नवेदिति शिष्टशुश्रूषा अतिथ्यादिपूजा साचपत्नीसंबंधाधर्मेणास्योपलक्षणार्थो गर्हिहिताधर्मयोग्यतापाद
७८ कपातित्यादिदोषवतानवेदित्यर्थः तादृशीचेद्व्रतपार्किंत्वमनेनैवविध्ययाकनिष्ठयापिकारयेत् याज्ञवल्क्यः
सत्यामन्यांसवर्णायांधर्मकार्यंनकारयेत् सवर्णासुविधौधर्मेज्येष्ठयानविनेतरः अन्यामसवर्णस्मं इदेवा
78 ष्मादियजमानोदुंवरीसमानवदेकयेदसवर्णयाज्येष्ठयाकारयेत् पत्नीसंनहनादित्वकेतृसंस्कारकेसहा
धिकृताभिः सर्वाभिरित्यादिमीमांसामासलमनुष्ठानं स्मार्त्ताग्निसाध्येतुकर्मणिसर्वासांसहाधिकारः
प्रथमविवाहाग्नावेवापरविवाहहोमविधिनानदसंभवेग्निद्वयसंसर्गविधानाच्च अतस्तत्राप्युक्तप्रयक
मेस्तुविवेकः द्वितीयादिविवाहेग्निनियममाहकात्यायनः सदारोन्यान्पुनर्दारानुद्वोढुंकारणान्तरात्
यदीच्छेदग्निमान्कुर्वन्क्वहोमोस्यविधीयते स्वाग्नावेवभवेद्धोमोलौकिकेनकदाचनेति अयंचनियमः ७८

© Dharmartha Trust J&K. Digitized by eGangotri

संभवे ग्रामो नगरादावसंभवे तु लौकिकाग्नौ हुत्वा तदनंतरमेडनाग्निकल्पप्रकारेण पुनराधानं कार्यं अत्र द्वितीयादिविवाहे
जीवत्पितृकोपि स्वयमेव नांदीश्राद्धं कुर्यात् नांदीश्राद्धं कुर्यात् नांदीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे पुनः अतऊ
र्ध्वं प्रकुर्वीत स्वयमेव तु नांदिकमिति स्मृतेः तत्र पितृवर्गविवाहाय मातृमातामहवर्गयोः कुर्यात् मातरि जी
वंत्यां मातामहवर्गस्यैव तस्मिन्नपि जीवति द्वारलोपाद्धि श्राद्धलोप एव सोपि साग्निकश्चेत्तेभ्यः पिता दद्यात्ते
भ्यः स्वयमेव मापि दद्यात् न तु लोपः हृद्दौ तीर्थे वसन्न्यस्ते नाते वपतिते सति येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं
स्तुतः इति मैत्रायणीयपरिशिष्टादित्यादित्याहुः द्वितीयादिविवाहे कालविशेष उक्तः संग्रहे प्रमदामृतवा
सरादितः पुनरुद्वाहविधिर्वरस्यैव विषमे परिवत्सरे शुभो युगले वापि मृतिप्रदो भवेत् जीवंत्यां तु पूर्वपत्न्यां
द्वितीयादिविवाहे नायं कालनियमः अथ तृतीयमानुषीविवाहस्य निषिद्धत्वात्तस्मिन्कर्तव्ये र्कविवाहविधिः
तृतीयानिषेधमाह मास्येकश्यपः तृतीयां मानुषीं चैव चतुर्थीं यः समुद्वहेत् पुत्रपौत्रादिसंपन्नः ऊढेवी

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ साग्निकोब्दस्याउद्वहे३ निसिद्धार्थे तृतीयां न कदाचन मोहादत्तानतोवापि यदि स्केन्मानुषी न — एषस्यैवनसंदेहो
७८ गर्गस्यवचनेयथा अन्यच्चात्तृतीयांयदिचोद्वाहेत्तर्हिंसाविधवाभवेत् संग्रहे तृतीयांयदिचोद्वाहेत्तर्हिंसावि
धवाभवेत् चतुर्थ्यादिविवाहार्थे तृतीयेऽर्कंसमुद्वहेत् आदित्यदिवसेवापिहस्तर्क्षेवाशनैश्चरे शुभदिनेवा
पूर्वाह्णे कुर्यादर्कविवाहकं देशादिब्रह्मपुराणे दर्शिते ग्रामात्प्राच्यामुदीच्यांवासपुष्पसंयुते परीक्ष्यपल
नोधस्तात्स्थंडिल्पादियथाविधिप्राप्तः स्नातालंकृतवासास्करकंगंधादिभूषिते सपुष्पफलशाखिक
मर्कंगुल्मेसमाश्रयेत् सल्लक्षणेनसंयुक्तः मर्कंसंस्थाप्ययत्नतः अर्ककन्याप्रदानार्थमाचार्यंकल्पयेत्तु
रा अर्कसन्निधिमागत्यजत्रस्वस्त्यादिवाचयेत् नांदीश्राद्धंहिरण्येनअष्टवर्गान्प्रपूजयेत् पूजयेन्मधुप
र्केणवरंविप्रस्यहस्ततः यज्ञोपवीतंवस्त्रंचहकर्णादिभूषणं उष्णीषगंधमाल्यादिवरायास्मैप्रदापयेत्
स्वशाखोक्तविधानेनमधुपर्कंसमाचरेत् ब्रह्मपुराणे यथाविधीतस्मानंतरं कृत्वार्कंपुरतस्तिष्ठेत् ७८

© Dharmartha Trust J&K. Digitized by eGangotri

प्रार्थयेत्तद्द्विजोत्तरः त्रिलोकवासिन् समस्तच्छायया सहितं रवि वस्त्रैर्माल्यैस्तथा गंधैस्तन्मंत्रेणैव पूजयेत्
तन्मंत्रेण कृतेनेत्यादिना अन्यत्रापि श्वेतवस्त्रेण संवेष्टनं तथा कार्या समंतत्तभिः गंधपुष्पैः समभ्यर्च्यात
ल्लिंगैरभिषिंच्य च गुडोदनेन नैवेद्येन ताम्बूलेन च समर्पयेत् अर्कं प्रदक्षिणं कुर्वन् जपेन्मंत्रमिमं बुधः ममः
प्रीतिकरा पर्ये मया सृष्टा पुरातनी अर्कजा ब्रह्मणा सृष्टा अस्माकं प्रतिरक्षतु पुनः प्रदक्षिणीकुर्यान्मंत्रेणाने
न मंत्रवित् नमस्ते मंगले देवि नमः सवितुरात्मने त्राहि मां कृपया देवि पत्नीत्वं मे इहागता अर्कत्वं ब्रह्म
णा सृष्टः सर्वप्राणिहिताय च वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्द्धनः तृतीयोद्वाहजं पापं मृत्यु
चाशु विनाशय ततश्च कन्यावरणं त्रिपुरुषं कुलमुच्चरेत् आदित्यः सविता वार्कः पुत्रपौत्री च नप्त्रिका
गोत्रं कश्यप इत्युक्ते लोके लौकिकमाचरेत् सप्तमैर्कैर्निरीक्ष्य तस्मिन् सूत्रं दारयेत् अशीर्भिः कुर्यादा
चार्यप्रमुखैर्द्विजैः अथाचार्यं समाहूय विधिना तन्मुखोद्वितो परिस्तरणं ततो होमं गृह्योक्तविधिमाचरेत्

© Dharmartha Trust J&K. Digitized by eGangotri

आवायैवदानमंत्रमाहव्यासः अर्ककन्यामिमांविप्रयथाशक्तिंविभूषितां गोत्रायशर्मणेतुभ्यंदत्तांविप्रसमा
श्रयेति अग्नेजल्पदत्तकर्माणिकृत्वार्ककणपूर्वके तावदर्कंप्रवेष्टयेत् स्पशाखोक्तेनमंत्रेणगायत्र्यावा
७८ यवाजपेत् पंचीकृत्यपुनः सूत्रंस्कंधेवष्णुतिमंत्रतः वृहत्सामेतिमंत्रेणसूत्रकार्पोप्रकल्पयेत् अर्क
स्यपुरतः पश्चात् दक्षिणोत्तरयोस्तथा ॐभास्करनिक्षिपेत्पश्चादाग्नेयादिचतुष्टये सवसंप्रतिॐभेवत्रिः
सूत्रेणैवर्वेष्टयेत् हरिद्रागंधराग्रुक्तं स्थापयेद्धौतलेजले प्रतिॐभेममहाविष्णुमेपूज्यंपरमेश्वरं पाद्यार्घ्यादि
नैवेद्यांतेऊर्यात्राम्नैवमंत्रवित् अत्रहोमप्रकाराशौनकेनोदर्शितः तृतीयेस्त्रीविवाहेतुसंप्राप्तेपुरुष
स्यतु आर्कविदाहंवक्ष्यामिशौनकोहंविधानतः अर्कसन्निधिमागत्यतत्रस्वस्त्यादिवाचयेत् नांदीश्राद्धं
प्रकुर्वीतस्थंडिलंचप्रकल्पयेत् अर्कमभ्यर्च्यसोपवीतगंधपुष्पाक्षितादिभिः सौर्यासूर्यदेवत्ययाश्राकृ
ष्णेनेत्यादिऋच स्वयंचालंकृतस्वद्गस्त्रमाल्यादिभिःशुभैः अर्कस्योत्तरदेशेतुसमन्वारुब्धपत्नया पत्नया ७८

© Dharmartha Trust J&K. Digitized by eGangotri

अर्ककन्यया उल्लेखनादिकं कुर्यादाचारामममतः परं आज्याहुतिं वज्जुहुयात्तं गोभिरन्नैयैकया एतयाकाम
कामायत्येतयर्चा ततः परं अस्ताभिश्च समस्ताभिस्ततश्चाग्निष्टकृद्भवेत् परिवेषणपर्यन्तमपाश्वेत्यादिकं क्रमा
त् प्रार्थनामंत्रादिविशेषमाहव्यासः पुनः प्रदक्षिणीकृत्वा मंत्रमेतन्मुदीरयेत् मयाकृतमिदं कर्म स्थावरेषु
जेरापुना अर्कापत्यानि मोदे हि तत्सर्वं क्षन्तुमर्हसि इत्युक्त्वा शान्तिसूक्तादिजप्त्वा तं विसृजेत्तु नः गोयुग्मं
दक्षिणां दद्यादाचार्याय वभक्तितः इतरेभ्योपि विप्रेभ्यो दक्षिणां वापि शक्तितः तत्स्वैगुरवे दद्यादं तेपु
ह्वाचयेत् अत्र पंचमदिने कर्तव्यमुक्तं ब्रह्मपुराणे चतुर्थे दिवसे तीते पूर्वं वन्नां प्रपूज्य च विसृज्य होमश्री
वविधिनामान्तं षीपरां उद्वहेदमथानैव पुत्रपौत्रादिहान्हिमान् न पश्येन्नव मित्राणि मंगलेनैव गच्छति एवमेहि
जश्रेष्ठ विधिना संस्यगुद्वहेत् यत्नेष्वन्यसमुद्दिष्टरक्षाशक्तिपरत्रचेति अथ धृतोपतः प्रयोगः उक्तेशादित्यवारा
दौउक्तदेशे यथोक्तार्कसमीपे गत्वावमाप्राणानायम्यदेशकालौ स्मृत्वा मम तृतीयमानुषीविवाहजदोषा

© Dharmartha Trust J&K. Digitized by eGangotri

भावार्थमर्कविवाहंकरिष्ये इतिसंकल्प्य आचार्यवरणंस्वस्तिवाचनादिकर्मतंत्रेणकुर्यात् तत्रहोमेविशेषः दिक्काका
ॐ· लादिसंकीर्तनादर्कविवाहांगभूतंहोममहंकरिष्ये तत्रपूर्वेणवाह्यणेगमनं उत्तरेणपात्रासादनं द्वेपवित्रे ता
७९ म्रमयीआज्यस्थालीपालाश्यः समिधः प्रोक्षाधारौ समिद्धतमेआज्यभागौ पूर्णपात्रंदक्षिणा देवताभि
79 ध्यानेविशेषः प्रजापतिं इंद्रं अग्निं सोमं अग्ध्मने बृहस्पतिं अग्निं वायुं सूर्यं प्रजापतिंचाज्येनशेषेणस्विष्ट
कृते ···· दि ···· आतान्तकृत्वासंगोभिरित्यस्यआंगिरसऋषिः त्रिष्टुप्छंदः बृहस्पतिर्देवता अर्कविवा
होत्तविघ्नमाज्याहुतिहोमेविनियः ॐसंगोभिरांगिरसोनक्षमाणोभगइवेदर्यमणंनिनाय जनेमि
त्रोनदंपतीश्चनक्षि बृहस्पतेवाजयाशूंरिवाजौस्वाहा इदंबृहस्पतयेनममेतित्यागः यस्मैत्वेतिवामदेव
ऋषिः त्रिष्टुप्छंदः अग्निर्देवताहोमेविनियोगः सर्वत्रपूर्ववत् यस्मैत्वाकामकामयवयंसम्राट्यजामहे
तमस्मभ्यंकामंदत्वायथेदंत्वंघृतंपिबस्वाहा इदमग्नये ततोव्यस्तसमस्ताभिर्व्याहृतिर्देवताहोमशेषसमा ७९

© Dharmartha Trust J&K. Digitized by eGangotri

पयेन ततः प्रदक्षिणप्रार्थनादिकर्मशेषसमापनं इतिप्रयोगरत्नेऽर्कविवाहविधिः सं. १९४४ श्रा. प्र १३॥

प.	पृ.	
१	१	मंगलाचरणम् १
१	१	संस्कारनामानि
१	१	तत्रमतभेदात्संख्याभेदः
२	२	शूद्रस्यमंत्रंविनासंस्काराः
२	२	स्वस्तिवाचनंकुकुकर्तव्यम्
३	१	तत्रयजमानस्यप्राङ्मुखत्वंतत्पत्नीसंस्कारयोर्यजमानदक्षिणोपवेशः प्राङ्मुखता चेति
३	१	स्वस्तिवाचनपद्धतिः
६	१	आभ्युदयिकश्राद्धंकुकुकर्तव्यम्
६	२	प्रसंगयत्संस्काराणांकृतौ आभ्युदयिकमेकवारं

प.	पृ.	
६	२	वसोर्धाराःपंचसप्तवा
६	२	षोडशमातरः
६	२	पुण्याहमंत्रजपः

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri